Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्रीहेमचंद्राचार्यग्रंथावली—नंबर,

कविश्रीमण्डनमन्त्रिविरचित—

# मण्डन ग्रन्थ संग्रह—

## (२)

## ( काव्यमण्डन–शृङ्गारमण्डनौ )

श्रीमत्पन्यासश्रीनीतिविजयसमुपदिष्ट–चाणस्मा-
वास्तव्य 'शाह–व्हालचन्द कचराचन्द'
इत्येतस्य द्रव्यसहाय्येन
पट्टनस्थश्रीहेमचन्द्राचार्यसभायाः सेक्रेटरी—
'शाह लहेरचन्द भोगीलाल' इत्यनेन
प्रकाशितः
श्रावकपण्डितप्रभुदास–वीरचन्द्राभ्यां—
च संशोधितः

प्रत ३००, प्रथमावृत्तिः

वीर संवत् २४४६. संवत् १९७६

पाटण ता. ८–१२–१९

मूल्यम् ०–७–०.

पुस्तकमेतत् "हिमकुमार जैन" मुद्रालये "संघवि–चन्दुलाल त्रिभुवनदास" इत्यनेन प्रकाशकाय मुद्रितम् पट्टन–(गुजरात) सालवीवाटके

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ अर्हम्

श्रीहेमचन्द्राचार्यग्रन्थावली नं० १७

मण्डनग्रन्थाङ्कः

# श्रीकाव्यमण्डनम्

१

श्रीमद्धाम स्तुमस्तत्त्रिभुवनमहितं यत्सदालिप्रजुष्टं
ध्यातं योगीन्द्रवृन्दैः स्वभवविहतये विघ्नविध्वंसकारि ।
नित्यं मद्वैतरागं विघटितबहलध्वान्तमालं नतानां
भक्तानां भूरिसम्पत्सरसितुहसमुद्भासते बालहेलिम् ॥१॥
यदनघपदपद्मध्यायिनस्ते यतीन्द्रा
न दधति विषयेषु स्वर्गभोग्येष्वपीच्छाम् ।
नतिमदमितसम्पत्कन्दलीकृष्णमेघः
स जयति सुरसेव्यो वीतरागः परेशः ॥२॥
पितामहः पाण्डवकौरवाणां धनुर्द्धरो दुर्द्धरबाहुवीर्यः ।
शशास भीष्मो नमितक्षितीशां सर्वंसहां साधुषु सोमरूपः ॥३॥
मूर्त्तिर्महेशस्य महीमहीनमूर्ध्नस्थितां विद्विषतां नृपाणाम् ।
कीलालपूरैरभिषिच्य धन्वी शिरःसरोजैः समपूपुजद्यः ॥४॥
असह्यदोःशौर्यनिदाघकाले यस्य प्रवृद्धे रिपुवाहिनीनाम् ।
शतानि शोषं निदधुर्जलानि तथोषितामश्रुझरे बभूवुः ॥५॥
धनुष्मतामाजिमुखेऽग्रगत्वान्निजेच्छया मृत्युवशंवदत्वात् ।
जितेन्द्रियत्वाच्च जिगाय योऽपि रामं यमं काममवार्यवीर्यम् ॥
नासत्ययुक्ता सुमनस्सुसज्जगन्धर्वविद्याधरराजहंसा ।
उच्चामरालिः सुरराजरम्या सभा सुधर्मेव च यस्य दीप्ता ॥७॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पितामहीयन्त्रकरोद्विशुद्धा कीर्त्तिर्यदीया त्रिजगन्ति यान्ती ।
विद्रावयन्ती दुरितानि पुंसां निर्वापयन्ती जनतां प्रतप्ताम् ॥
विद्याम्बुधीनां किल पारदृश्वा मध्येमनःपङ्कजमच्युतं तम् ।
जितेन्द्रियत्वं च दधत्सुधर्मो राजर्षिरासीद्य उदारकीर्त्तिः ॥९॥
परिस्फुरदुर्द्धरमण्डलाग्रकरं परास्तोद्धतराजलोकम् ।
ध्वस्तान्धकारावरणं विराजत्सचक्रपद्माकरहर्षहेतुम् ॥१०॥
सदण्डमुच्चण्डतरप्रतापविध्वंसितारोत्करमुष्णदीप्तिम् ।
यथा यमुर्वीपतयः प्रणेमुः किरीटरत्नद्युतिरञ्जिताङ्घ्रिम् ॥११॥
एके त्वपायुर्भुविलक्षमन्येऽधिकं च लक्षादपि मार्गणानाम् ।
गणा धनुर्धारयतोऽतिदानशौण्डस्य यस्याहवदुस्सहस्य ॥१२॥
उद्दामकर्मारमहे रणाढ्यैः समुद्धतैः खड्गिभिराश्रितश्च ।
अत्यर्थमुत्तालतमालमालायुतैश्चकासत्तिलकाभिरामैः ॥१३॥
इक्ष्वाकुवंशप्रकरैः प्रवृद्धैः पुन्नागपूगैरभितोऽप्यशोकैः ।
सद्वैरिकद्युत्कटकप्रकाण्डैः परिस्फुरन्नर्मदयोपगूढैः ॥१४॥
अगण्यगन्धर्ववरैः सरामैर्महागमस्तोमरसैर्द्विजेन्द्रैः ।
कान्तारमालालसितान्तरैश्च यो विन्ध्यभूमीध्र इव व्यराजत् ॥
१५ ॥ कुलकम् ॥

हिमर्त्तवो वा बहुधान्यसम्पत्सम्पादका वा शरदागमाश्च ।
प्रभूतपद्माभ्युदया यथैव तपर्त्तवस्तीव्रतरप्रतापाः ॥१६॥
मधोरिवामी सुमनस्सु घस्राः प्रोद्दाममामोदभरं दधानाः ।
स्फुरच्छरासारभरं किरन्तस्ते प्रावृषेण्या अपि वासरा वा ॥
हेमन्तकाला अपि वारिनारीस्तनान्तरेषूद्धतमुष्णिमानम् ।
तन्वन्त उच्चैरुचिरोरुरोप सचित्रचापद्युतयोऽभिरामाः (?) ॥१८
दुर्योधनाद्याः कुरवः कुमाराः कुमारकल्पाः स्मररूपरूपाः ।
पाण्डोस्तनूजाश्च युधिष्ठिराद्या निरन्तरं यं त उपासते स्म ॥१९॥
अन्तकुलकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उद्दामवाग्द्रविणो द्विजन्मा द्रोणो गुरुः पाण्डवकौरवाणाम् ।
धन्वी मृधोद्भूतकृपः कृपोऽपि स द्रोणसूनुर्भुजशौर्यशाली ॥
स कर्ण आकर्णविकृष्टधन्वा सुवर्णविश्राणनलब्धवर्णः ।
महाहवेऽखण्डितमार्गणौघैरुपास्यमा स्तपनप्रतापः ॥२१
दुर्योधनो मानधनः स चापि चापिप्रबर्होनगुणैरनर्हः ।
दुःशासनोत्युद्धतबाहुदर्पदुःशास्यशौर्योऽथ नृपः सुधर्मा ॥२२॥
धर्मात्मजोऽधिक्षितिलब्धकीर्तिर्भीमोऽतिभीमाहवदुःसहौजाः ।
पार्थो नृपार्थोद्धरणो रणोग्रगाण्डीवजीवाध्वनिडम्बरेण ॥२३॥
सान्द्रीभवद्बाष्पजलौघसान्द्रीकृतारिनारीजनतीव्रवीर्यौ ।
माद्रीसुतौ तावतिमात्रकान्तौ परःशतास्तेऽपि परे नरेन्द्राः ॥
यस्यासते स्म स्फुरितोरुतारहारप्रभाभासुरविग्रहाश्च ।
ग्रहा इवानुग्रहनिग्रहाभ्यां मित्रेऽप्यमित्रेऽपि च लक्ष्यमाणाः ॥
सुचारुचामीकरकुण्डलाभाः सदंशुकालीः शुककिंशुकानाम् ।
कौशेयमप्यंशुकमादधानमुल्लासयन्तोऽसतटस्थमुच्चैः २६॥
किरीटकेयूरमयूररोचिरनेकरत्नद्युतिभासिताभ्राः ।
मिलत्सिताभ्रान्मलयोद्भवानां रसान्स्तनावध्यालिकं दधानाः ॥
सारङ्गनाभिद्रवमुद्रवद्भिर्द्विरेफसङ्घैःप्रसभावलीढम् ।
अक्षौभ्यसौरभ्यमृतुप्रसूनस्रजां समूहं च शिरोरुहेषु ॥२८॥
महाब्धयो वा स्फुरितोर्मिकान्ता घनाघना वा परितः स्फुरन्तः ।
सत्स्वर्णसातिप्रथिता सभायां छायादलच्छापचया द्रुमा वा ॥
विचित्रसचीनपिनद्धभास्वत्कटीतटाः श्रीमदुरःकपाटाः ।
वेतण्डशुण्डालटभप्रवेष्टाः सोष्णीषशीर्षाः कमनीयवेषाः ॥३०॥
घनाघनध्वानगभीरधीरगिरः प्रगल्भा इव सिंहसावाः ।
मदोद्धतानेकपराजिदृष्टदुर्वारवीर्या कुरुपाण्डुपुत्राः ॥३१॥
गुरोरशिक्षन्त कुमारकास्ते कोदण्डविद्यां निरवग्रहद्याम् ।
अधिज्यधन्वोद्धुरपाणयोऽमी निषङ्गसङ्गाशुगशोभिपृष्ठाः ॥३२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ते धार्त्तराष्ट्रानजयन्विशेषैस्तैस्तैर्गुणानां गुरुसन्निधाने ।
अवर्द्धयन्मत्सरमप्यमीषां मनस्यनल्पं च युधिष्ठिराद्याः ॥३३॥
अहमहमिकयाऽमी रेमिरे राजपुत्रा अहरहरहरीशप्रस्फुरत्तेजसस्ते ।
प्रमदमविभृतान्तैः सद्गुणैस्तज्जनन्यावतुलमहिमभिर्वा देवदैत्यैस्त-
दम्बे ॥३४॥
श्रीमद्वन्द्यजिनेन्द्रनिर्भरनतेः श्रीमालवंशोन्नतेः
श्रीमद्बाहडनन्दनस्य दधतः श्रीमण्डनाख्यां कवेः ।
काव्ये कौरवपाण्डवोदयकथारम्ये कृतौ सद्गुणे
माधुर्यं पृथु काव्यमण्डन इते सर्गोऽयमाद्योऽभवत् ॥

( २ )

अथ घनाघनमत्तमतङ्गजो निमिषरोचिरुदञ्चितकेतनः ।
रुचिरशक्रशरासननिष्पतच्छरचयं रचयन्भुवि संभवत् ॥ १ ॥
बहलगर्जितकुञ्जलदागमः प्रमदवच्छिखिबन्दिभिरीडितः ।
अतनुभूतिरिवोद्धतभूपतिः सनतपंनतपंतमहन्नरिम् ॥ २ ॥
सकलइन्द्रियवर्ग इवात्मना विकलतां वहते भृशमुज्झितः ।
ऋतुगणः समयेतिमुदोन्नदद्दवनदोवनदोमुहुरध्वनत् ॥ ३ ॥
रुचिरचामरचारुबलाकउच्छ्रतशिलिन्ध्रसितातपवारणः ।
प्रकटयन्सुतरामृतुराजतां प्रमुदिरो मुदिरोदय आबभौ ॥ ४ ॥
स्मरनृपस्य नवाम्बुदमालया निशि धृतास्तरला इव दीपिकाः ।
रुचिमधुः शुचिकेतकमप्यभाच्छिततपं ततमञ्जुलमालिवत् ॥५॥
घनवनीनवनीपतरूल्लसत्कुसुमसौरभभृद्वनमारुतः ।
शिशिरशीकरभारभरं किरन्नपथिकान्पथिकान्समकम्पयत् ॥६॥
कुकवयो मुखरा इव दर्दुराः समरटन्समुपात्तजडाशयाः ।
क्षणमभुस्तडितो वियतीव ताः क्षतनये तनये च कुरोः श्रियः ॥
उदभवन्मदनः सह कन्दलैः प्रमदवन्मदबद्धवधूहृदि ।
जलधरध्वनितं वियुतास्ततं समधुनान्मधुनाध्वगयोषितः ॥८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समधुपामधुपातिरजोवृता नवलतावलतामरुताधुता ।
सुविटपा विटपानरतापणे वरमणी रमणीव वने बभौ ॥९॥
मघवगोपगणैर्विदधे धरा प्रचुररागभरा सह कान्तया ।
शिखिकुलं प्रवितत्य कलापकं व्यतनुताऽतनुताण्डवमुन्मदम् ॥
बहलशाखिकुलं बलवद्दवानलविपद्दलितं समशिश्वसत् ।
यदधिभूमितपार्त्तिमपाछिदन्निजवनैर्जवनैः पवनैर्धितैः ॥११॥
सकलचातकयाचकमण्डलीतृशमयंशमयज्जलवृष्टिभिः ।
यदकरोत्सुहृदं शिखिमण्डलं धृतमुदं तमुदञ्चितताण्डवम् ॥१२॥
सकलसस्यकुलान्युदलासयज्जनपदं न पदं न मुदां दधत् ।
त्रिभुवनोपकृतिः स कृती ततः स्मरसितं रसितं विदधे घनः ॥

अन्तकुलकम् ॥

ऋतुरभूद्घनवृष्टिमयस्तदा सुखकरः कुरुपाण्डुतनूभुवाम् ।
विदधतां दधतां सशरं धनुः समृगया मृगयानसमुद्धताः ॥१४॥
प्रविविशे विविशेषकुलाऽकुला विस्मरैः स्मरैश्च वनस्थली ।
नृपसुतैः पृथुतैऽण्यभयंकरी घनलतानलतालतता ततः ॥१५॥
सहरिणा हरिणाश्रितगह्वरा वनवराहवराहवकृद्दरा ।
शशवरैः शवरैश्च धनुर्द्धरैर्धनगजैर्नगजैश्च विराजिता ॥ १६ ॥

युग्मम् ॥

कलकलोद्धुरधीरधनुर्धरैर्विशिखविद्धवराहपथानुगैः ।
सरभसक्षुभितोग्रमृगद्रवद्दुरवयोरवयोग्यभवद्दवः ॥१७॥
तृणचरेषु वसत्सु वनान्तरे मृगगणेष्विव सत्सु दधत्स्वलम् ।
प्रविगतस्पृहतामतिघातकाः पिशुनकाः शुनकाः स्म भषन्ति च ॥
द्रुतमजिग्रहदात्मकुलोद्भवान्मृगगणो हरिणान्मृगघातिनः ।
खल इव स्वजनानहितान्सतोजानिरये निरये पतनेच्छया ॥१९॥
मधुरवागिव सज्जनमण्डलं खलजनः सरलं मलिनान्तरः ।
मृगमहन्मृगयुर्मृदुवंशजस्वनरसे नरसेवित आदृतम् ॥२०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षुभितदुस्सहसिंहपटूभवध्वनितभीलुकभिल्लवधूचयम् ।
चकितसैरिभपातविनिर्दलच्छरवणं रवणं पतताङ्गणे:॥२१॥
दरभरद्रुतनिष्पतच्छशब्दकक्षतरक्षकिरोत्करम् ( ? )
प्रचुरशाकुनिकोत्कटकौटिकैः कवलिताबलिताप्रगतस्वपकम् ॥
प्रतिथवत्पृथुपार्थधनुष्पतच्छितशिलीमुखभिन्नमृगादनम् ।
सरवकौरवकार्मुकपत्रिभिः प्रपततां पततां निवहैश्चितम् ॥२३॥
शशकुलं द्रवतां जविनां शुनां विवरमाशुविशत्पिदधद्वपुः ।
प्रहसमास्यमधाज्जनताव्रजैस्ततरुषा तरुखातनिपातिनाम् ॥२४॥
कुपितपार्थवृकोदरनिध्वनद्धनुरुदारविदारणमार्गणैः ।
हतगवाशनसत्त्वमभूद्वनं नवधवं वधवन्धनवन्मृगम् ॥२५॥

अन्तकुलकम् ॥

कुसुमजालकजालकवल्लता मधुपतन्मधुपध्वनिमालिनीः।
कुटजवत्कुटजार्जुनकेतकी स्फुटकदम्बकदम्बकसौरभाः ॥२६॥
वनपयोऽनपयोषितिपुंसिशं प्रवलयन्वलयंश्च वनावलीः ।
बहलयन्हलयन्त्रविकृष्टभूविवरतोवरतोषधराद्विपम् ॥२७॥
सततगं ततगन्धमदभ्रमुज्जगदयंगदयंतामिहाध्वगान् ।
सुरततां तततांतरनिर्वृतीर्मदबलादबलाः परिलालयन् ॥२८॥
अथ कुरुप्रभवानपि पाण्डवान्हरिदधीश्वरशस्यपराक्रमान् ।
वनविहारजघर्मजलाकुलान्प्रपवनः पवनः स्म निषेवते ॥२९॥

इष्यद्द्रोणशिखण्डिशल्पशकुनिप्रोत्कृष्टनाशे कुरु-
क्षेत्रे वा विपिने महाजगरभृद्भीष्मान्तराले ततः ।
प्रेङ्खत्पत्ररथान्विखण्ड्य विशिखैः खड्गिव्रजांश्चोद्धता-
नाजग्मुर्वरहास्तिनापुरममी ते पाण्डवाः कौरवाः ॥३०॥

श्रीमदुन्नयजिनेन्द्रनिर्भरनतेः श्रीमालवंशोन्नतेः ।
श्रीमद्बाहडनन्दनस्य दधतः श्रीमण्डनाख्यां कवेः ।
काव्ये कौरवपाण्डवोदयकथारम्ये कृतौ सद्गुणे

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माधुर्ये पृथुकाव्यमण्डन इति सर्गो द्वितीयोऽभवत् ॥

३

पद्मोदयं विदधती भुवनेष्वथोच्चै-
　　रातन्वती विमलतां च जडाशयेऽपि ।
निष्पङ्कतां विदधती भुवि धर्मसूनो-
　　र्वृत्तिर्यथा सुकृतिनः शरदाविरासीत् ॥१॥

उच्चैस्तपत्तपनतापनितान्ततान्त-
　　लोका क्वचिज्जलदडम्बरवृष्टिरम्या ।
मन्दारविन्दमकरन्दसुगन्धिवायु-
　　र्यासौ निदाघसमयस्य बभार लक्ष्मीम् ॥२॥

प्राच्याश्रुर्न रजस्वलत्वमखिलाः स्वच्छोदकाः सिन्धवः
　　प्रोद्दामप्रमदं दधुः कलगिरः काष्ठासु हंसालयः ।
स्वच्छोऽबिभरुः प्रसादमभितो वक्रेष्वमूः साम्बरा
　　बभ्राजे सुविकाशकाशकुसुमैर्भूमण्डली मण्डिता ॥३॥

आविःपेतु सरोजसौरभभरभ्रान्तालयः शालयः
　　पाकोद्रेकफलौघभारनमिता बभ्राजिरे भूरिशः ।
मन्दं मन्दममी समीरनिवहा वान्ति स्म सप्तच्छदो-
　　न्निद्रत्कोकनदारविन्दकुमुदामोदच्छटामेदुराः ॥४॥

उच्चैर्यौवनयौवतोद्धतयुवमारभ्यमाणोल्लस-
　　द्भानाबन्धनिबन्धवन्निधुवनप्रोद्दामखेदच्छिदः ।
यामिन्यां शुशुभेतरां शशधरः कर्पूरगौरद्युतिः
　　श्रीकण्ठेक्षणवह्निदग्धमदनप्रोद्बोधधन्वन्तरिः ॥५॥

उन्मीलन्नवकन्दलीदललसत्कं बिन्दुजालच्छला-
　　द्बिभ्राणा गरुडाश्मशोभितमहामुक्तावलीभूषणम् ।
संरेजे मृदुशाड्वला च वसुधा यस्यां प्रणेन्दुर्मदा-
　　च्चञ्चत्पल्लवतल्लजाः परानतहृदो विद्रावयन्तो नृपाः ॥६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कादम्बिनी सुमलिनाऽप्यधिताऽमलत्वं
दिक्चक्रवालमचकाद्विरजस्कमेव ।
लब्धोल्लसद्गुणगणां शरदं प्रशस्यां
सत्सङ्गतिर्हि विदधाति शुभं न केषाम् ॥७॥

सानन्दं प्रमदाजनैर्नवनवं वासोवसानैर्लस-
त्पाण्यम्भोरुहहैमपात्रनिहितोद्दीप्रप्रदीपालिभिः ।
बन्धून्निर्भरशोभमानभवनो नीराजयद्भिर्मुहु-
र्दीपालीमह आजगाम स शरद्यानन्दसन्दोहदः ॥८॥

उच्चैः प्रासादभित्तौ बहलविनिहिता दीपमाला ज्वलन्ती-
र्विध्वस्तध्वान्तजालाः निशि दधति धरामण्डली पत्तनानि ।
यत्र यान्ति प्रदीपौषधिविधुतलसत्काण्डकैलाससलक्ष्मीं
कर्णव्यग्राङ्गनाली मधुमथनवधूशोभितागारभाञ्जि ॥९॥

रत्नालङ्कारदिव्याम्बररुचिरतनून्मङ्गलस्नानशुद्धा-
न्भास्वद्रूपाभिरामस्वजनपरिवृतान्हैमसिंहासनस्थान् ।
नम्रा नीराजयन्ति प्रमुदितनृपतीन्दीपमालामहेऽस्मि-
न्सत्पात्रस्थैः प्रदीपैश्चरणरणझणन्नूपुरा बन्धुवध्वः ॥१०॥

सुस्नाता घनमर्मराणि वसते वासांसि वामभ्रुवः
कुर्वन्त्युत्तमहेमभूषणपटानाप्त्वा प्रियेभ्यः प्रियाः ।
लक्ष्मीशा ददते स्वबान्धववधूवर्गाय यस्मिन्मुदा
वस्त्राण्युत्तमभूषणानि बहुशो नीराजनाः कुर्वते ॥११॥

हेमन्तकालो बहुधान्यऋद्धिर्जज्ञे ततः पञ्चशरप्रवृद्धिः ।
यस्माद्भियेव प्रसभं प्रविष्ट उष्मा वधूनां स्तनमण्डलानि ॥१२॥

निहारभारभरनिर्भरकम्पकायाः
कान्ताः कठोरतरपीनपयोधराढ्याः ।
उद्गाढरागसुभगं परिरेभिरे स्वा-
न्प्राणेश्वरांस्ततनिशासु निशान्तमध्ये ॥१३॥

For Private and Personal Use Only

यत्र क्षेत्रसुरक्षणक्षणनभूत्तुङ्गाट्टमारुह्य त-
रसत्कौतूहलवत्कृषीवलकुलं कोलाहलव्याकुलम् ।
उद्भ्राम्यद्भुजभिण्डिमालविगलच्चण्डोपलस्फुट-
त्सूत्रभ्रान्तपरित्रसत्खगगणव्यग्राग्रहस्तद्वयम् ॥१४॥

स्मारं स्मारं प्रेयसीनां हठोष्मप्रौढोरोजद्वन्द्वगाढोपगूढम् ।
प्राणानीहायामिनीहैमनीहा नीहाराढ्येहाध्वगैर्नीयते तम् ॥१५॥

मदनवह्निमदीदिपदुच्चकैर्हिममरुद्वियुताः समकम्पयत् ।
न च तथा जठराग्निमजिज्वलन्न च तथाध्वगमूः समवेपयत् ॥१६॥

अथ समन्मथमन्थरसुन्दरीरसपरायणकामुकवल्लभः ।
हिमऋतुः समभूद्धिममारुतैरधिककम्पितपान्थवधूजनः ॥१७॥

इदं बाष्पश्वासात्पथिकवनितानां नयनयो-
र्निशाऽभूद्दाघिष्ठा सह विरहिणीश्वासनिवहैः ।
दधुर्वैवर्ण्यं वध्वस्तनु घनरागं च दयितं
हिमः स्म श्यामायन्स्तुदति रतिदष्टौष्ठमनिलः ॥१८॥

वातत्रातविधूतचूतविसरस्फारस्फुरन्मञ्जरी-
निर्यत्पिङ्गपरागमुर्मुरदवैर्दग्धाध्वनीनव्रजः ।
आसीत्कोकिलकोमलध्वनिमिलन्मत्तालिमालोच्चर-
ज्झङ्कारैर्विधुरीभवद्विरहिणीचित्तो वसन्तस्ततः ॥१९॥

लता पुष्पवती जाता मधोः सङ्गाद्वधूरिव ।
लसत्पल्लववस्त्रेण लज्जितात्माननमावृणोत् ॥२०॥

भृङ्गाली श्रुतिधारिणीव विदधे गुञ्जारवं सुश्रवं
व्यातेनेऽपि च पञ्चमस्वरमसौ पुंस्कोकिलः कोमलम् ।
पुष्पौघस्तबकस्तनी नवलता सत्पल्लवोल्लासव-
त्पाणिर्नृत्यति नर्त्तकीव ललितं वातावधूता स्म च ॥२१॥

उन्मीलन्मलयानिलैः सरजसः पुष्पोत्करः शाखिनां
व्याकीर्णः परितो धरामुदवहद्गाढानुरागं स्फुटम्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सन्वङ्गीव वनस्थली सुविकसत्सत्किंशुककर्णभूना
सान्द्रामोदघनाभ्युपेयुषि मधौ पत्युस्तु नूनां प्रिये ॥२२॥
सुजातिमासाद्य लसद्गुणाढ्यामपि द्विरेफो विजहौ क्षणेन ।
बभ्राम लोलश्चलतान्तराणि कुतो विवेको मधुपे हि दृष्टः ॥२३॥
सद्रोलम्बकुलाकुलः सबकुलेऽभूद्वञ्जुलो मञ्जुलः
पुष्पौघैस्तिलकः सकोरकयुतो माकन्द आनन्दकृत् ।
आमोदास्पदमाकरन्दभरदोन्मञ्जरीपिञ्जरी-
भूताश्चोऽव्वगदारदारणकृदासीत्कोविदारद्रुमः ॥२४॥
जज्ञे गन्धफलीगुणेन विफलीभूतान्यपुष्पावली
सौरभ्येण शिरोधृता युवतिभिः कामाह्वतां बिभ्रती ।
अन्याश्चाप्यमिता लताः कुसुमिताः सौरभ्यलुभ्यद्भ्र-
मृङ्गालीतरलीकृताः शुशुभिरे श्लिष्टा नवाक्ष्याद्यधाः ॥२५॥
कौसुम्भवासः स्तनमण्डलेभ्यः स्खलद्दधानाः पवनावधूतम् ।
जगन्ति जेतुं चलतः स्मरस्य महापताकामिव पार्थिवस्य ॥२६॥
सलीलनृत्यद्भुजवल्लिवेल्लत्मक्वाणवत्कङ्कणरत्नभासः ।
तडिल्लताविभ्रममाभजन्त्यो विडम्बयन्त्यो सरसेऽम्बरस्थाः ॥
संशिञ्जाना इव मञ्जुदोला दोलच्छलाचत्सुरतं प्रशस्तम् ।
उच्चैरुदश्चत्तनुचीनचेलविलासवत्सज्जघनस्थलस्थाः ॥२८॥
व चालयन्त्यो मणिमेखलाश्च परिक्वणत्कामधनुर्गुणाभाः ।
पदस्खलन्नूपुरशब्ददम्भात्तमाह्वयन्त्यो मदनं सुदूरात् ॥२९॥
हिन्दोलहेलात्रुटितोरुहारान्मुक्ताः पतन्तीः प्रचकासयन्त्यः ।
अधिक्षपं चारुविलासभाजस्तारा इव प्रेक्षितुमागतास्त ः ॥३०॥
परिस्फुरच्चोलचलाञ्चलान्तः किञ्चित्प्रकाशस्तनकुम्भभासः ।
श्यामालकौघस्खलितालिमालमाल्यावकीर्णाङ्गणभूमयश्च ॥३१॥
सुतारगीतालपितप्रमुग्धत्सरागचित्ताः कमनीयरूपाः ।
आन्दोलयन्त्यो युवलोकचेतांस्य त्र दोलामबला विलेसुः ॥३२॥
अन्तकुलकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दहन्भूभृद्वंशान्स्वजनितहुताशोद्धततम-
प्रतापैः शाखाभृद्द्विजनिवहविभ्रंशपटुभिः ।
महावाहिन्योघानगदपि तपन्शोषयति य-
स्ततो भीष्मो ग्रीष्मः स उदयमयादुष्टनृपवत् ॥३३॥

विरहविधुरावस्था दध्रे प्रियान्वितकामिनी-
ष्वहरहरहो येनोशीरक्षरज्जलशीकरैः ।
अधिकुचयुगं मुक्ताहारैरदभ्रसिताभ्रव-
न्मलयजरसैरङ्गासङ्गैर्भृशोष्मविभेदिभिः ॥३४॥

तारावली मौक्तिकजालरम्या पूर्णेन्दुवक्त्रा लसिताम्बरान्ता ।
जाता जनानां तनुतापहन्त्री रामा त्रियामा च सुशीतलाङ्गी ॥

ग्रीष्मे शून्याः प्रकाराः ककुभ उदभवन्दावदग्धा वनान्ता
वात्या सोल्मुकोऽभूद्धरणिरनलवन्मुर्मुरीभूतपांसुः ।
नद्यः पर्णैः कषायक्वथिततनुजला वह्निवर्षी विवस्वा-
न्धान्याः श्यामीकृताभा धिगुदयमसतां जातविश्वोपतापम् ॥

वाताघातविधूतवेणुविटपिस्कन्धौघसङ्घट्टन-
प्रोद्भूतज्वलनस्फुलिङ्गपटलीनश्यन्नगौकश्चयम् ।
कीलालीकवलीकृतार्भककुलोन्मीलत्कृपाकोमला-
कूतभ्रान्तसगर्भमन्थरमृगीयूथं तपेऽभूद्वनम् ॥३७॥

कुलोद्भवत्वं न कुशीलतायाः प्रायेण हेतुर्जगतीतलेऽस्मिन् ।
दग्धा तपर्तौ हि वनस्थलीयं स्ववंशजातेन हुताशनेन ॥३८॥

प्रियं पयोऽभूत्सदुशीरशीतलं तृषः प्रशान्त्यै स्फुटपाटलालकाः ।
सुचन्दनालेपजुषो मृगीदृशो वनानि सेव्यान्यभवंस्तपागमे ॥३९॥

सर्वर्त्तवस्ते सुखदा बभूवुः साम्राज्यभाजां कुरुपाण्डवानाम् ।
भूयिष्ठभोगानुभवैः प्रहर्षैर्महामहानां च परम्पराभिः ॥४०॥

श्रीमद्युग्मजिनेन्द्रनिर्भरनतेः श्रीमालवंशोन्नतेः
श्रीमद्वाहडनन्दनस्य दधतः श्रीमण्डनाख्यां कवेः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काव्ये कौरवपाण्डवोदयकथारम्ये कृतौ सद्गुणे
माधुर्ये पृथुकाव्यमण्डन इति सर्गस्तृतीयोऽभवत् ॥४१॥

४

अथ महद्धोद्धतशौर्यभासां महाभुजानामनुभावभाजाम् ।
धर्मेऽनुरागं दधतां भुवेऽलं श्रीकैटभारौ परमां च भक्तिम् ॥१॥
धनुर्धराणां धुरि तिष्ठतां च भूमण्डलभ्रामियशोऽध्वगानाम् ।
सदाश्रयाणामनृतोज्झितानां स्मेराननानामभिभाषणेषु ॥२॥
अपारविद्याम्बुधिपारगाणां प्रजानुरागैकभुवां स्वराणाम् ।
रूपेण नित्यं भजतां नयं च कल्पद्रुमाणामिव दानशौण्ड्यात् ॥३॥
समुज्ज्वलश्लाघ्या अपि भाजनानां बलीयसां स्फीतहृदयाश्रयाणाम् ।
दुर्वारवीरोद्धुरसङ्गरान्तसञ्चारपञ्चाननविक्रमाणाम् ॥४॥
दिगीश्वराणामिव पाण्डवानां गुणाननर्घ्यान्गणशोभिरामान् ।
न सेहिरे मत्सरिणोऽतिमात्रं ते धार्तराष्ट्रा महतां खला वा ॥५॥

कुलकम् ॥

ते पाण्डवानां निधनाय धाम लाक्षामयं छद्मकृतोऽतिपापाः ।
अचीकरच्छिल्पकृतां समुहैरभ्रंलिहं चारु सुयोधनाद्याः ॥६॥
व्यडम्बयद्यद्रवखण्डं यद्बालमार्त्तण्डमण्डलम् ।
छायालङ्कृतमुग्रोत्तैलोहिताश्मसमप्रभैः ॥७॥
राज्याभिलाषा विषयेषु लुब्धा दुर्बुद्धयः क्रूरतरान्तरास्ते ।
संमन्त्र्य संमन्त्र्य च सर्व एव सुयोधनाद्या धृतराष्ट्रपुत्राः ॥८॥
व्यशिश्रयंस्तच्छरणं च तेभ्यः सदाश्रयायामितमानपूर्वम् ।
कुन्तिसुतेभ्यः सरलान्तरेभ्यस्तेऽशिश्रियंस्तद्गृहमेकदापि ॥९॥

युग्मम् ॥

लाक्षासौधस्य मध्ये निशि समुदभवज्ज्वालज्ज्वालजाल
आशगतपारापतप्रध्वजपटपटलः प्रोच्छलद्धूमपालः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



शुद्धान्तभ्रान्तकान्ताग्रहणरभसवत्सौविदल्लप्रपातः
मोद्गच्छद्विस्फुलिङ्गः सपदि हुतवहः कल्पकालाग्निरौद्रः ॥
लाक्षासंमिश्रसर्ज्जद्रवशबलबृहद्दारजस्तम्भवृन्दे
प्रासादे भूरिरत्नोच्चयचमरमहाक्षौमहेमौघपूर्णे ।
विभ्रश्यद्वाजिराजीसमदगजघटाचारुचेटीसहस्रे
वर्द्धिष्णूद्भूतधूमान्धतमसपिहितद्वारि दन्दह्यमाने ॥११॥
संरुद्धाः पाण्डवास्ते प्रबलहुतभुजा प्रौढधूम्यावलीढाः
सार्द्धं संभ्रान्तमात्रा हृदयसमुदयद्भूरिकारुण्यपूर्णम् ।
प्राहग्रस्तद्विपेन्द्रप्रचुरदरहरं सर्वगं निश्चयमीशं
संसारोद्दामदावानलरसजलरसं सस्मरुः कृष्णमेघम् ॥१२॥
युग्मम् ॥

नारायणस्य चरणस्मरणप्रभावात्
संनिर्गता वसुमतीविवराध्वनाशु ।
ते पाण्डवाः परमधर्मधुरीणरूपाः
कुन्त्याऽम्बया सह प्रिया पृथुकं प्रमूर्च्या ॥१३॥

न शुशुभे नगरं घनशोकवत्यातिकपज्जनमण्डलसङ्कुलम् ।
वपुरिवेन्द्रियवर्गसमुज्झितं विरहितं विबुधोपमपाण्डवैः ॥१४॥

वृथा पृथायास्तनया नयाढ्या दग्धा विदग्धा जतुमन्दिरस्थाः ।
विद्वेषवद्भिः कुरुराजपुत्रैः पापात्मभिर्धिग्भृतो हहाऽत्री ॥१५॥

दीनानुकम्पां च करिष्यते कः को मानयिष्यत्यपि मानयोग्यान् ।
वर्तिष्यते सन्नति कः प्रजासु भृशानुरागात्त्विह बन्धुवच्च ॥१६॥

वर्णाश्रमान्कः खलु पालयिष्यत्यलं च षष्ठांशहरः सुधर्मा ।
तच्छ्रेयसां साम्प्रतिमार्यवृत्तानजातशत्रुप्रभृतीन्नरेन्द्रान् ॥१७॥

धनुर्द्धरान्दुर्द्धरबाहुवीर्यान्रणाङ्गणे निर्जितवीरवर्यान् ।
महामहाव्यीननयान्विनेति बाष्पाकुलाः पौरजना विलेपुः ॥१८॥
कुलकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रत्येकमेकं परिधानमेव संबिभ्रतोऽथाप्यनुपानहोऽङ्घ्रीन् ।
अम्बान्विता दुस्सहदुःखभाजो विभ्रष्टराज्या नरदेवसिंहाः ॥१९॥
अत्युष्णनिश्वासपरम्परास्याः शोच्यामवस्थां दधतः सलज्जाः ।
धृताधयो जग्मुरमी महान्तस्ते हास्तिनाख्यान्नगरात्सुदूरम् ॥२०॥
युग्मम् ॥

तीव्रामर्षमहाभिमानविभवद्वैलक्ष्यचिन्ताभर-
व्रीडासंज्वरदैन्यशोकविवशीभूतात्मनःस्वानुजान् ।
तामम्बामतिदुःखितामथ महाधैर्यैकवारांनिधि-
र्धर्मात्माऽभिदधे युधिष्ठिर इदं वाक्यं कृपाकोमलः ॥२१॥

बताम्ब ! वत्साः परिपश्यताद्य नृशंसतां पापकृतां कुरूणाम् ।
सौहार्दभाक्षुप्रणयातिरेकं बिभ्रत्सु वाञ्छत्सु च तच्छुभानि ॥
तत्पक्षपातेन विपक्षलोकं विघ्नत्सु सार्द्धं विहरत्सु नित्यम् ।
प्रीत्या सजग्धिं विदधत्सु चाक्षैर्दीव्यत्सु विश्व समुपाश्रयत्सु ॥
रक्षत्सु राज्यं प्रबलाहितेभ्यो भुञ्जत्सु लक्ष्मीं प्रविभज्य बह्वीम् ।
न व्यावहारीं विजहत्सु हार्दाद्ददत्सु तेभ्यः परितोषकाले ॥२४॥

सुक्षौमहेमोत्तमरत्नभूषागजेन्द्रवाजीन्द्ररथप्रवर्गान् ।
युष्माभिरस्मभ्यमिह प्रदेयमावाङ्क्षि पृथ्वीं परिपालयद्भिः ॥२५॥

सुखस्थितेभ्यः स्वमिति ब्रुवत्सु सत्यां गिरं सौहृदहार्दिहत्सु ।
सुशिक्षमाणेषु गुरोश्च गुर्वीं कोदण्डविद्यां सहतैर्हताशैः ॥२६॥

प्रध्वेसमं प्रेक्ष्य समागतांस्तानुत्थायमानं प्रणयत्स्वजस्रम् ।
इत्थं तदाराधनमेव नित्यमस्मासु कुर्वत्स्वपि बान्धवेषु ॥२७॥

लाक्षागृहं तच्च महानिशीथे प्रदाह्य विष्वग्दहनाव्रजीढम् ।
आः केनचित्पापकृतानरेण दुर्योधनाद्यैर्धृतराष्ट्रपुत्रैः ॥२८॥

सुखप्रसुप्तेष्वदसीयगर्भे ह्यस्मासु भूयिष्ठविवृद्धधूमे ।
तत्क्रूरकर्माचरितं मदान्धैरास्माकवंशक्षयकारि पापैः ॥ २९ ॥
कुलकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रूरासुरेन्द्रप्रसभाभिभूतप्रह्लादभक्तैकवशंवदेन ।
अनाथदीनोद्धरणेन तेन संरक्षितास्ते वयमच्युतेन ॥३०॥
वीराः! सुधीराः! जहिताहितैस्तैः कृतं विषादं विधिनिर्मितं तम् ।
अत्यन्तपापस्य फलानुभूतिरिहैव लभ्येति वदन्ति सन्तः ॥३१॥
धनुर्धरा धर्मभृतां धुरंधरा धराधरा धैर्यचयोच्चसानवः ।
महाभुजा विक्रमवक्रकोदरस्फुरत्प्रतापार्जुनमद्रजात्मजाः ॥३२॥
माध्वं कुरुध्वं वचनं निधद्ध्वं चित्ते ममैतत्सुकृतैकहेतु ।
अहानि हानिप्रचुराणि यावत्तावद्धि तीर्थाटनमाश्रयामः ॥३३॥
युग्मम् ॥
इति श्रुते तद्वचने गरिष्ठे स भीमसेनः क्षतशत्रुसेनः ।
उच्चैः प्रहस्यान्तरुदितकोप इमां बभाषे गिरमुग्रवीर्यः ॥३४॥
बाल्यात्प्रभृत्येव समत्सरास्ते स्फारं विरोधं दधते विमूढाः ।
अस्मासु राजन्! कुरुराजपुत्रा यथा खलाः सज्जनमण्डलेषु ॥
व्याघ्रे वृके भोगिनि धानरे वा न वानरे क्रूरतरे विदध्यात् ।
प्रीतिं परप्राणविनाशनिष्ठे प्राज्ञो जनो भव्यमिहेच्छुरेव ॥३६॥
ते दुर्जनाः सज्जनसंनिधाने हिंस्रा वसन्तो जनपावनेऽपि ।
जहत्यहो नैव निजस्वभावं गङ्गाजले नक्रगणा इवामी ॥३७॥
सुरासुराणामिव काद्रवेयविहङ्गमानामिव बान्धवत्वम् ।
अन्योऽन्यवैरास्पदमेव जज्ञे राजन्न एषामपि कौरवाणाम् ॥३८॥
मत्क्रोधवह्नावपकारदीप्ते पापाः पतिष्यन्ति पतङ्गवत्ते ।
न चेत्तवोद्दामदयाम्बुदाली तच्छान्तिकर्त्री भवितान्तरायः ॥
धानुष्कधौरेयममेयवीर्यं गाङ्गेयमङ्गेयबलं गुरुं च ।
राधेयमाराधितरेणुकेयं महाहवे मुक्तकृपं कृपं च ॥४०॥
दुःशासदुःशासनमूर्जिताश्वत्थामानमुद्दामतमाभिमानः ।
दुर्योधनोऽन्यानपि योधमुख्यानाराधयन्भूरिधनप्रदानैः ॥४१॥
आवार्द्धिभूमण्डलमाप्तुमिच्छुरेकातपत्रं विषयेषु लुब्धः ।
विमूढबुद्धिर्नरदेवदेव! प्रदग्धवान्नः कपटेन पापः ॥४२॥ कलापकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रणैकवीरोऽपि सहायमेत्य महामृधे मां प्रबलानिलं वा ।
धनञ्जयो धक्ष्यति दीप्ततेजाः सुबान्धवो नः परसैन्यवन्याम् ॥
अजातशत्रो ! भवदाज्ञयैव पुण्यानि तीर्थानि दिदृक्षवोऽद्य ।
सहाम्बयेमामवनीं बभ्रामः कञ्चिच्च कालं प्रविमुक्तराज्याः ॥

श्रीमद्वन्द्यजिनेन्द्रनिर्भरनतेः श्रीमालवंशोन्नते
श्रीमद्बाहडनन्दनस्य दधतः श्रीमण्डनाख्यां कवेः ।
काव्ये कौरवपाण्डवोदयकथारम्ये कृतौ सद्गुणे
माधुर्ये पृथुकाव्यमण्डन इते सर्गश्चतुर्थोऽभवत् ॥४५॥

५

खर्जूरोत्तालतालीसरसपनसवत्तुङ्गपुन्नागपूगं
श्रीमत्तामालमालं जलधिमथ तमालोकयन्पाण्डवास्ते ।
ध्वस्ताध्वश्रान्तिमुच्चैश्चपलचिलिचिमोच्चालचाचालकोल-
त्कल्लोलोच्छालहेलापरिकलितनभोगाहिगङ्गाप्रवाहम् ॥१॥
ततस्ते तत्तीरे तरलतरतारङ्गमरुता-
नमद्रम्यारामे ददृशुरवनेः पाण्डुतनयाः ।
जगन्नाथं नाथाजगदघघटाघस्मरमजन्त-
मुग्रदुःखालीदवदहनजञ्जालजलदम् (?) ॥२॥
नानागोपाङ्गनालीभ्रमितरसभृता किं त्वया मेऽस्ति कार्यं
प्राणाधीशेऽतिमानग्रहणकलुषितामात्मकान्तां नितान्तम् ।
यातां तातान्तिकं तां सरसिजनिलयां सादरं चानुनेतु
नित्यं संतिष्ठमानं तटभुवि जलधेस्ते प्रणेमुः परेशम् ॥३॥
अजरममरमाद्यं वेदवाचामवेद्यं
सगुणमगुणमेकं नैकरूपं महिष्ठम् ।
अणुतरमविदूरं चातिदूरं दुरन्तं
दुरितचयमदन्तं योगिचित्ते वसन्तम् ॥४॥
स्वपदमपि ददानं सर्वसृष्टेर्निदानं
नि----कृपयैतांश्चावतारान्दधानम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रबलदनुजकन्दोद्दालकुद्दालबाहुं
सुरनिकरकिरीटोद्घृष्टपादारविन्दम् ॥५॥

स्तुत्वा तमीशं स्वतमस्तमीशं नरोत्तमास्ते पुरुषोत्तमं द्राक् ।
गम्भीरवाग्भिर्निगमार्थभाग्भिर्वाणारसीं भेजुरथौघभेत्रीम् ॥६॥

आमिक्षापृषदाज्यपायसजुहूयूपैर्धवित्रध्रुवा
प्राग्वंशैश्चरुभिश्च खालचमसैश्चावैणशृङ्गैः शुभैः ।
अन्यैश्चापि पवित्रपात्रनिवहैर्निर्मथ्यमानारणि-
प्रोद्गीर्णाग्निकणैरुपाकृतगणैः स्वर्णौघपूर्णार्थिभिः ॥७॥

जुह्वद्भिर्बहुभव्यहव्यमनघैः सत्सामिधेनीधरै-
रध्वर्युप्रमुखैर्द्विजैर्मखमुखे कुण्डप्रदीप्तानले ।
प्राज्यप्राज्यमिलत्तिलाहुतिततिप्रोत्सर्पिसर्पिःसुधा-
स्रो गन्धोद्धुरधूमधोरणिघनीभूताम्बुवाहावलौ ॥८॥

शुद्धैः श्रौतपवित्रमन्त्रनिचयानुच्चारयद्भिर्मुहु-
स्तुष्यद्यज्ञफलप्रदायिपुरुषे सुस्नातजायायुताम् ।
प्रासादैर्ध्वजमालभारिशिखरैः सद्धर्मकुम्भप्रभैः
प्रारब्धावभृथैर्दलज्जगदघैर्यायज्वनां निर्बभौ ॥९॥

भास्वत्यभ्युदिते तथाप्यनुदिते होमोद्यतैर्दीक्षितैः
सुस्नातैर्धृतरत्नकुण्डलयुगैर्दर्भस्फुरत्पाणिभिः ।
सद्वेदध्वनिभिः प्रणीतविधिभिः पञ्चानलीमण्डली-
धूमध्वस्तसमस्तलोककलुषैः सद्वृत्तपत्न्यान्वितैः ॥१०॥

प्रणीतभैक्षैः सुकषायवस्त्रैः कमीरदण्डैः प्रणवप्रजापैः ।
जितेन्द्रियैः शान्ततमैः प्रभूतभूतानुकम्पैः समलोष्टरुक्मैः ॥११॥

अभ्यस्तवेदान्तमहागमज्ञैर्निष्क्लेशवर्गैः सुसमाधिमद्भिः ।
मुमुक्षुभिर्ब्रह्मलयैकतानैर्नित्यं यतीन्द्रैः समुपास्यते या ॥१२॥

रुद्राक्षमालाभरणैः प्रभूतभस्माङ्गरागैरपि वीतरागैः ।
स्फुरज्जटाभारधरैरघोरपञ्चाक्षरीजापपरायणैश्च ॥१३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुनर्भवक्लेशविनाशदक्षदाक्षायणीवल्लभलीनचित्तैः ।
परःशतैः पाशुपतैः प्रशान्तस्वान्तैः सुनिश्रेयसमाप्तुकामैः ॥१४॥
आदिकुलकम् ॥

उद्दाममानन्दभरं दधानास्ते पाण्डवाः सत्कविपुङ्गवास्ताम् ।
काशीं समीक्ष्य श्रुतिशास्त्रशस्तां न्यष्टाविषुर्विष्टपनाथमित्थम् ॥

अस्ताक्षीद्भगवानपारकरुणः काशीं स भूतेश्वरो
मुक्तिक्षेत्रकिरीटमण्डनमणिं देवर्षिभिः सेविताम् ।
यस्यां सन्मणिकर्णिकाऽमलजले त्यक्त्वाऽङ्गिनः स्वास्तनूः
कैवल्यं सममेव यान्ति विषयासक्ता विरक्ता अपि ॥१६॥

केश्यं शैवलजालवच्छशिकला व्यावृत्तमत्सीव सा
पद्मालीव ललत्कपालवलयं तन्नालवद्भोगिनः ।
यन्मूर्धन्यघसङ्घस्मरसरित्तीरे श्रियं भेजिरे
संसारज्वरभारभञ्जनपटुः स स्तात्सतां सम्पदे ॥१७॥

भालाक्षिज्वलदाशुशुक्षणि भुजभ्राजिष्णुभास्वत्फणि
स्फारस्फारकरस्फुरत्प्रहरणिव्याश्लिष्टशृङ्गारिणि ।
मूर्द्धासङ्गिमहातरङ्गिणि गलव्यालम्बमानोल्लल-
न्मुण्डश्रेणि तदद्भुतं हृदि दधे रूपं परं शाङ्करम् ॥१८॥

उन्मीलद्विषयावलिच्छलमिलद्वातायुतृष्णाजले
शोकोद्दामदवाग्निदीपिनि भवारण्ये भवावद्रुतम् ।
बद्धं वागुरया स्वमातृतनयभ्रातृप्रियाकारया
दृप्यद्दर्पकलुब्धकेन विधुरं मां वध्यमानं मृगम् ॥१९॥

रोचिष्णुद्विपचर्मणे रसलसद्गौरीस्फुरन्नर्मणे
मूलोन्मूलितकर्मणे प्रणमतां स्फारीभवच्छर्मणे ।
रक्षार्थं धृतवर्मणे प्रहरणैर्भिन्नद्विषन्मर्मणे
भीतानां घनवर्मणे मम नमस्तस्मै परब्रह्मणे ॥२०॥

मुह्यन्ति श्रुतयस्तवोरुमहिमाम्भोधिभ्रमभ्रान्तयः
साऽन्योन्यं कलहायते ह्यविदुषीत्वाद्वेशषड्दर्शनी ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रान्ता शेषफणालिरप्यजचतुर्वक्त्री तव स्ताविका
यज्जल्पाकमपाकमिव मां तद्भोः क्षमस्व प्रभो ! ॥२१॥
प्रशस्य विश्वेश्वरमीश्वरास्ते विश्वम्भरायाः करुणाम्बुराशिम् ।
स्नात्वा च तस्यां मणिकर्णिकायां सभाजिताः पौरजनैर्महान्तः ॥
परस्परस्य श्लोकांस्ते शशंसुः पाण्डुनन्दनाः ।
दर्शं दर्शं च काशीं तां विस्मिताः स्वर्गसन्निभाम् ॥२३॥
अथौघमन्माघजलौघमज्जद्धिमानिलोत्कम्प्रमनोज्ञमुग्धम् ।
विहारवन्निर्जरराजरामावक्षोजकाश्मीरपरागरागम् ॥२४॥
ततः प्रयागं कृतपापभङ्गं संभिन्नगङ्गायमुनातरङ्गम् ।
तटान्तबद्धाश्रमवीतरागं ते पाण्डवा जग्मुरुपात्तवेगम् ॥२५॥
या वीचिभङ्गं वहते जलौघं हिनस्ति यालं जनतापदोषम् ।
या काशभासेन पयःशितिम्ना चकास्ति गङ्गा यमुना च सोर्व्याम् ॥
स्नात्वा च गङ्गायमुनाजलौघे निर्वाणदे भग्नघनाघसङ्के ।
संवर्णयामासुरमी कवीन्द्रास्ते पाण्डवा विष्णुपदीमपीत्थम् ॥
उद्दामभ्रमिसंभ्रमानिलचलच्चेलाञ्चलप्रोच्छल-
च्छ्रुतिव्याकुलमीक्षणोत्पलयुगं व्यालोक्य भागीरथि ।
नृत्यद्भर्गकपर्दमध्यविलसद्व्यालोलवीचीपृष-
त्सान्द्राद्रीकृतभस्मनोपकृतिमाकार्षीः शिवायाः शिवे ॥
अभ्यास्यन्नो गङ्गां शिरसि गिरिशो लोललहरी-
दलद्देहोत्तापां दुरितदमनीं चेद्भगवतीम् ।
ज्वलद्वह्निज्वालाकवलिततृतीयेक्षणपुटप्रत-
प्तैतन्मूर्द्धास्रगिति निरवास्यत्कथमिव (?) ॥२९॥
चलद्वीचीहस्तैर्बहलतमपङ्काविलतनुं
जनं माता बालं सुतमिव दयाधीनहृदया ।
त्वदुत्सङ्गे गङ्गे विलुठितपरं पापदमनैः
सुधाशुभ्रैः प्रक्षालयति भवती निर्मलजलैः ॥३०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संवर्त्तनृत्तनटधूर्जटिचण्डमौलि-
वेगोच्छलद्बहललोलमहोर्मिपाताः ।
शुभ्रांशुशुभ्रचलचामरसाम्यभाज-
स्त्रैस्रोतसास्त्रिभुवनानि पुनन्तु पूताः ॥३१॥

नृत्यारम्भविलोलधूर्जटिजटाजुटात्पतन्तः क्षितौ
जाह्नव्या जलबिन्दवः सुरवरैरुत्प्रेक्षिताः पान्तु वः ।
वामाङ्गस्थितशैलराजदुहितुर्धम्मिल्लपुष्पोच्चयः
किंस्वित्तत्त्रुटितोरुहारविगलन्मुक्ताफलानां गणः ॥३२॥

तीरप्रान्तविहारिभूरिहरिणव्यालम्भबद्धोद्यम-
व्याधव्रातदुरन्तपातकशमेदक्षोपकूलानिला ।
मज्जन्निर्जरमौलिमध्यविगलन्मन्दारमालावली
सान्द्रामोदसुगन्धिवारिरमरस्रोतोवहा पातु वः ॥३३॥

उत्क्षुभ्यत्कल्पझञ्झानिलतरलजटाजूटकुट्टाभिघात-
प्रेङ्खोलस्वर्गगङ्गाजलबहलचलल्लोलकल्लोलघोषः ।
शीघ्रं घोराघसङ्घं विघटयतु स वो नृत्यतः शूलपाणेः
प्रध्वस्ताम्भोदनादो नटनमुरजतामाप पापापहो यः ॥३४॥

येषां वपूंषि पयसि प्रणिमज्जनान्ते
कम्पं दधत्युरुरदध्वनि मासि माघे ।
दोर्दर्पदुर्द्धरधराधिपचक्रमत्र
ते कम्पयन्ति सुरगद्यभिषेणनेषु ॥ ३५ ॥

जननि! जह्नुसुते! तव तोयगा ध्रुवममी अभवन्नृभवो झषाः ।
अनिमिषत्वमिमे दधतेऽन्यथा कथमहो तदिदं दिविषद्गणाः ॥

तस्यास्तरङ्गानिलधूतरम्यरोधावनीमध्यवसन्वरिष्ठाः ।
फलौघनम्रीकृतपादपौघां ते पाण्डवाः स्नानविशुद्धदेहाः ॥३७॥

श्रीमद्वन्द्यजिनेन्द्रनिर्भरनतेः श्रीमालवंशोन्नतेः
श्रीमद्बाहडनन्दनस्य दधतः श्रीमण्डनाख्यां कवेः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काव्ये कौरवपाण्डवोदयकथारम्ये कृतौ सद्गुणे
माधुर्यं पृथुकाव्यमण्डन इते सर्गोऽभवत्पञ्चमः ॥३८॥

६

अथैकदाहर्त्तुमिते फलानि भीमे गदास्त्रे क्षुधिते वनान्तम् ।
किर्म्मीरनामा दनुजः स कश्चिन्मायी ययौ तान्प्रति विप्रवेशः ॥१॥
अम्बासुरेण द्विजवेषभाजा निजानुजेनान्वितमेनमेनः ।
अन्तर्भजन्तं भुजदुर्जयं तमभ्यागतं श्रान्तमिवाध्वयानात् ॥२॥
उपास्यमानो महनीयकीर्त्तिस्ताभ्यां यमाभ्यां च कपिध्वजेन ।
तयाऽम्बया पार्श्वनिषण्णयैष न्यग्रोधमूले विहिताधिवासः ॥३॥
प्रेमोर्मिकर्म्मीरवचोभिरामं पप्रच्छ किर्म्मीरमुदारवीर्यः ।
स शूरतः शूरतमानुजन्मा धर्मात्मजः सन्नतमौलिरेतत् ॥४॥
कुलकम् ॥

अये द्विजन्मन् ! कुत आगतोऽसि श्रमंस्तपर्त्तावतिमात्रखिन्नः ।
तले वटस्यातिसुशीतलेऽस्मिन्मार्गोश्रमं मुञ्च निषीद तावत् ॥
इति क्षितीशस्य वचो निशम्य स छन्नविप्रोऽभिदधे दनुजः ।
महाकृते ! त्वद्वचसाऽमुनाऽस्मि ध्वस्ताध्वखेदो यमुनाम्बुनेव ॥
इदं धरित्रीवलयं भ्रमामि नैकानि तीर्थानि दिदृक्षुरेव ।
भवादृशामुत्तमदर्शनेन पुनामि चात्मानमघाङ्करेण ॥७॥
सौजन्यभाजां भवतां समीपे द्वित्राण्यहान्यत्र वसामि तावत् ।
सत्सङ्गतिर्हि त्रिदशापगेव तापत्रयध्वंसमसौ विधत्ते ॥८॥
इत्थं तदीयं वचनं स राजा श्रुत्वाऽभ्यधाद्विप्र ! सुखं वसेति ।
अभ्याययौ पक्वफलौघपूर्णकरण्डकश्चण्डगदः स भीमः ॥९॥
कालातिपातस्तव वत्स ! जातः किं काननं पर्यटतः फलार्थम् ।
नहीदृशे कर्मणि योग्यता ते यानाधिरोहोचितराजसूनो ! ॥१०॥
मध्याह्नकालः समुपस्थितोऽयं तोयं प्रयात त्रिदशापगायाः ।
बुभुक्षिताः स्थ त्वरितं तनूजाः ! स्नानार्थमित्युक्तवती च कुन्ती ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदाज्ञया ते तटिनीमुपेताः साकं जनन्या यमसूनुमुख्याः ।
नेदीयसीं मंक्षु पटीयसीं तां कर्मद्रुमूलोद्दलने नराणाम् ॥१२॥
अम्बा तदम्भोविहिताभिषेका तीरे तरौ सा निषसाद साध्वी ।
विहर्तुकामाश्च तपर्तुतप्ता मध्येह्रदं पेतुरमी तटान्तात् ॥१३॥
भिमस्य रामस्य भृतोऽभिपाताद्वृहद्भुजस्योत्क्षुभितं पयस्तत् ।
क्रोशज्जनन्या इव तीरगायै वक्तुं गतं तत्तनयापराधम् ॥१४॥
वेलद्दाहाविद्धवारिप्रवाहान्दर्पोद्भीमः प्राक्षिपद्धीररावान् ।
पार्थः पाथःपूरमास्थत्समन्तादन्योन्यस्य व्याकुलीभूतदृष्टि ॥
उच्चैः कूलोत्फालहेलाप्रखेला व्यातन्वाना मज्जनोन्मज्जनानि ।
पारे तीरोल्लङ्घनोत्तीर्णवेगाः स्पर्द्धावन्तस्ते मिथस्तेरुरप्सु ॥१६॥
विद्यामम्भस्तम्भनीं धर्मसूनुर्वह्वाश्चर्यान्दर्शयन्भीममुख्यान् ।
मध्येनीरं निश्चलीभूतदेहस्तस्थौ यामौ द्वौ कृतप्राणरोधः ॥१७॥
हर्षोत्फुल्लल्लोचनैर्लोकसङ्घैः संदृष्टास्ते पाण्डवाः प्रेक्षणीयाः ।
मैन्यान्विताः स्वानुभावप्रकर्षाद्राजन्तो वा स्वाश्रमं द्रागभीयुः ॥

तत्र न्यग्रोधमूले श्रुतिपठनपरैर्भूमिदेवैः सनाथे
मध्येपीठं गणेशग्रहपतिगिरिजाशार्ङ्गिभिः सेव्यमानम् ।
देवं संस्थाप्य शम्भुं स्फटिकमयममुं भुक्तिमुक्तिप्रदं तं
नित्यं चाद्यन्तशून्यं जगदुदयपरित्राणसंहारहेतुम् ॥१९॥

राजपूतासनस्थः क्षणविधृतमरुद्भूतशुद्धिं च कृत्वा
श्रीमत्प्रासादपञ्चाक्षरमनुमनुभिर्भासितैरागमानाम् ।
तत्तत्सिद्धिप्रदैस्तैः पृथगथ च पृथक् पूजयामास शान्तः
सौरभ्यलुभ्यद्भ्रमरभरपरीरम्भभाग्भिः प्रसूनैः ॥२०॥

आनीतैः पादपानां प्रयततदनुजैर्गन्धसारद्रवौघैः
स्फारैः कर्पूरपूरैः सुरभिमृगमदैरक्षतैरक्षतैश्च ।
धूपैः कृष्णागरूत्थैर्बहलपरिमलैर्दीप्रदीपावलीभि-
र्वहीयःशङ्खघण्टाकलकलशबलं सेवितो भीममुख्यैः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दत्ताशीर्विप्रवर्यैर्हुतभुजमजुहोत्सर्पिषेद्धं समद्भिः
सद्भ्योऽदाद्दक्षिणाश्च प्रयततरमना मातरं चाभिवाद्य ।
भूदेवांश्चापि पीत्वा कविवरकविताः सुश्रवाश्च श्रवोभ्यां
मीमांसातर्कशास्त्रोज्ज्वलमतिमतिमद्वाग्विलासान्गुणज्ञः ॥
वेत्ता सर्वागमानां स्मयरहितमना रञ्जयन्सुनृताभि-
र्गीर्भिर्गीतानुरक्तो ददद्खिलकलाकोविदेभ्यो वदान्यः ।
तुष्यंस्तत्तद्गुणैः स्वं सुहितसदतिथिः स्वादुमांसपाकमन्नं
स्वादुं कारं स्म भुङ्क्ते स सममवरजैर्मातृदत्तं फलाढ्यम् ॥
॥२३॥ कुलकम् ॥

तदन्नं बुभुजे माता भुक्तशेषं महर्षिभिः ।
सभामध्यास्त धर्मोऽपि मताम्बूलोऽनुजैः सह ॥२४॥
ततः परेद्युश्च तथैव याते वृकोदरे वन्यफलानि हर्तुं ।
किर्मीरदैत्यः स महाभिचारहोमं चकार प्रजजाप मन्त्रम् ॥२५॥
हिंसाकरं सत्वरसिद्धिदं च श्मशानवाटे वटमन्निकृष्टे ।
हुङ्कारवत्कृतपिशाचचक्रे सदक्षिणीराक्षसशाकिनीके ॥२६॥
उत्तालवेतालकरालकालकङ्कालकूष्माण्डकडाकिनीके ।
अट्टहासवत्प्रेतकरं करङ्के प्रहर्षवद्भैरवभैरवे च ॥२७॥
उदितकिलिकिलाके योगिनी चक्रवाले
विकटडमरुनादक्षेत्रपालाकुले च ।
मनुजमहिषमेषैः कुक्कुटैरारटद्भिः
कलितकुसुममालैर्वध्यमानैः सुरौद्रे ॥२८॥ कुलकम् ॥
महेशतिथ्यां च महानिशीथे प्रदीपमालादलितान्धकारे ।
दिगम्बरो मुक्तकचोप्यभीकः स पाण्डवोन्मोहनसिद्धिमाप ॥
पूर्वोदिताभ्यामसुरेश्वराभ्यां सर्वेऽपि बद्धाः किल पाण्डवास्ते ।
संमोहिताः स्वानि धनूंषि धर्तुं हस्ते विनष्टस्मृतयो बभूवुः ॥
द्विषत्सुदुर्लङ्घ्यमहाद्रिदुर्गे संप्रापिता यावदमी नृसिंहाः ।
तावद्धि भीमाय स्वगादयश्च न्यवेदयन्भीतिमतिप्रतीकाः ॥३१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रुत्याऽब्रवीत्प्रातरुपाश्रिताशां सा पाण्डवी पाण्डवबन्धभेद्रीम् ।
सा भैरवी भीमरवा रुराव वामा वनान्तेऽस्य वृकोदरस्य ॥३२॥
स कृष्णसारोऽपि जगाम वामः शिवा बभाषेऽर्करथस्थितोच्चैः ।
घूकोऽपि घूत्कारमसावकार्षीद्भयंकरं दक्षिणतोऽसकृच्च ॥३३॥
भानुर्बभाषे परिवेषदम्भात्तद्भ्रातृवर्गस्य च बन्धनानि ।
मत्वा निमितान्यशुभानि भीमो निजाश्रमं शीघ्रगतिर्जगाम ॥
तैर्भ्रातृभिश्चैव ऋतेऽम्बया च शून्यं वटस्थानमवेक्ष्य भीमः ।
बभ्राम शोकाकुल आश्रमाणि भागीरथीतीरगतानि तानि ॥
अभ्यर्थ्य केनापि महर्षिणामी प्रेम्णानुनीता महितुं महान्तः ।
सौहार्दभाजो महनीयशीलाः पुण्याश्रमं धर्मपुरस्सरास्ते ॥३६॥
किं वा पुनस्तैः कुरुराजपुत्रैः सुक्रूरकर्माचरितं सपापैः ।
अस्मान्विदित्वा कपटेन युक्तैराशङ्कमानैर्निजराज्यभङ्गम् ॥३७॥
किं वा सुरेण द्विजवेषभाजा मायाविना तेन दुरात्मनामी ।
संमोह्य नीता निधनाय धर्ममुख्याः स्थितेनात्र दिगीशशौर्याः ॥
इत्थं विकल्पाकुलितान्तरात्मा स्वभ्रातृविश्लेषविरूढशोकः ।
संशुष्ककाष्ठोपचितां चितां प्राक् प्रवेष्टुमैच्छद्दहनावलीढाम् ॥
स भीमसेनः किल यावदेव दुःखातिभारेण विमूढबुद्धिः ।
संस्मारितस्तावदसौ नियत्या हिडिम्बया दत्तमसौ वरं स्वम् ॥
सा प्रादुरासीद्विकृतातिघोरा स्मृता सती तेन महाप्रभावा ।
नृमुण्डमालाशितशूलपाणिः प्रोत्तुङ्गतालद्रुमदभ्रजानुः ॥४१॥
पिशङ्गकेशी विकरालवक्त्रोल्ललद्रसज्ञांचलचालरौद्रा ।
विभो! किमर्थं भवता स्मृताहमित्थं वदन्ती सहसापुरस्तात् ॥
४२ ॥ युग्मम् ॥
तां राक्षसीं वीक्ष्य जगाद भीमो भीमाकृतिं बाष्पजलाविलाक्षः ।
प्रसन्नवक्त्रामिति स प्रमृज्य स्वनेत्रयोरश्रुततीरभीतिः ॥४३॥
हिडिम्ब! आर्ये! विदितोग्रवीर्ये स्मरस्यमुं दास्यसि सुप्रसन्ना ।
मह्यं वरं नैर्जतवंशमौलिमालेऽत्र बाले हतशत्रुजाले ॥ ४४ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तद्ब्रूहि मद्भ्रातृवरान्वियुक्तान्मया सहेमान्मरणोन्मुखेन ।
इति श्रुते तद्वचने प्रहृष्टा स्पष्टाट्टहासं विदधे हिडिम्बा ॥४५॥
किर्म्मीरनाम्ना दनुजेन नीतास्त्वद्भ्रातरः छद्मकृता स्वधाम ।
हन्तुं स्वदेव्याः पुरतस्तदेहि मत्स्कन्धमारुह्य लघु प्रयाहि ॥४६
तस्याः स्कन्धमारूढो भीमोऽभीः सगदः स्वपदात् ।
निजजानुभराग्रपीनोत्तुङ्गपयोधरम् ॥४७॥
उत्पपात तरसाथ राक्षसी व्योम लोलनरमुण्डकुण्डला ।
आससाद कुस्मासुरीं च तां भूधरेन्द्रशिखरे विराजिताम् ॥४८॥
अन्तर्दधे तत्र निधाय भीमं सा यातुधानी किल राजधान्याम् ।
तेषां प्रवृत्त्यै स सरोऽश्रयद्यदा यत्पयःपूर्णघटाङ्गनौघम् ॥४९॥
श्रीमज्जिनेन्द्रनिर्भरनतेः श्रीमालवंशोन्नतेः
श्रीमद्बाहडनन्दनस्य दधतः श्रीमण्डनाख्यां कवेः ।
काव्ये कौरवपाण्डवोदयकथारम्ये कृतौ सद्गुणे
माधुर्ये पृथुकाव्यमण्डन इते सर्गोऽयं षष्ठोऽभवत् ॥

( ७ )

किर्मीरनामदनुजोऽथ कृताभिरक्षो
रक्षोगणान्प्रहरणोग्रकरान्शशास ।
रे पाण्डवानयत तत्कुलदेवतायाः
सद्माशु यत्नसहिता हननाय तावत् ॥१॥
संदानिता नितरां जननीममीषां
संरक्षतात्र पृथगेव पुरस्थगेहे ।
पूजापरिच्छदमहं परिगृह्य याव-
द्राङ्गीगणैर्द्रुतमुपैमि युतो मुदेति ॥२॥ युग्मम् ॥
ये पाण्डवा वधकदैत्यभटैश्च नीता
देव्या गृहाङ्गणभुवं चलरक्तमालाः ।
सिन्दूरशोणशिरसस्त्रपया नतास्या
हास्याश्रयाः परिवृताः पुरलोकसङ्घैः ॥३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संमेनिरे निगतिमेव बलीयसीं तां
केचिद्विवेकविमलाः पुरवासिनस्ते ।
संवीक्ष्यपाण्डुतनया नमितौजसस्तां-
स्तादृग्दशांस्त्रिभुवनप्रथितप्रतापान् ॥४॥

आवेगतः स्तनयुगस्खलितांशुकान्ता
कान्ताथ काचन विषादवती स्वगेहात् ।
निर्गत्य लोलनयनाब्जगलज्जलौघा-
हा हा हता इह तपस्विन एव केचित् ॥५॥

देव्याः पुरः प्रचुरपापकृतातिहिंस्र-
किर्मीरदैत्यविभुनेत्यवदत्स्वसख्यै ।
एतान्निशम्य वचनं पृथुवज्रपात-
निर्घातघोरमनघा भुवि निष्पपात ॥६॥

श्रीकुन्तिभोजकुलकैरवकौमुदी सा
संतप्यमानबहुपौरवधूपरीता ।
मूर्च्छत्प्रमोहमहिमोद्धतराहुजग्धा
चैतन्यरूपरजनीपतिराप्ततापा ॥७॥

आश्वासिता विगतमोहभरा वधूभि-
र्दुःखार्दिताभिरभितः किल पाण्डुपत्नी ।
उच्चैरुरोद बहलाश्रुजलाकुलाक्षी
स्मृत्वा गुणान्गुणवतां निजनन्दनानाम् ॥८॥

हा धर्मधर्मपरराजधुरीण रीण
रेपः परात्म समतायुत हा महात्मन् ।
हा मातृवत्सल निजावरजानुकम्पिन्
हा सत्यवादवादं नन्दन नंदजात्मन् ॥९॥

सौहार्दहार्दहृदयोरुदयोदयोद्य-
द्भूतप्रभूतभयभञ्जनदानवारे ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संसारघोरतरसंज्वरभारहार
विश्वोपकारकरणात्तदशावतार ॥१०॥
कीनाशकिङ्करपराभवभूरिभीति-
भक्तावलीजगरनिर्ज्जरवन्दिताङ्घ्रे ! ।
योगप्रसक्तमुनिमानसराजहंस !
ब्रह्मेशवन्द्य ! निगमागमनूयमान ! ॥११॥
सर्वेश ! सर्वग ! विभो ! तनुमत्तनुस्थ !
यज्ञेशयज्ञफलद तरवार्यवीर्य ! ।
कृष्ण ! स्वभक्तिपरपार्थसपक्षपात
किं मे त्वया बत सुताः समुपेक्षितास्ते ॥१२॥ कुलकम्

हा ! पार्थ ! घोररणदुर्द्धरराजलोक-
चक्रेषु वारणघटाविषमान्तरेषु ।
कः सम्प्रति द्युतिमुपैति कराग्रजाग्र-
द्गांडीवनिःसृतशरांस्त्वदृते प्रवर्षन् ॥१३॥
क्व स्थश्च तावथ यमौ सयमौ सरूपौ
माद्रीसुतौ सविनयौ सगुणौ सशौर्यौ ।
मय्यास्थितौ प्रचुरभक्तिभरेण वत्सौ
दत्तं मम प्रतिवचो विधुरीभवन्त्याः ॥१४॥
हा ! हा ! विधे ! प्रलयमारुतवन्मदीया
भग्नास्त्वया किमु सुताःसुरभूरुहो वा ।
पञ्चैव मुक्तकरुणेन यदीयदोष्णां
छायाश्रया सुखमगां जगतीतलेऽस्मिन् ॥१५॥
हा ! वत्सभीम ! हृदये मम जाज्वलन्तं
शोकानलं शमय वागमृतप्रवर्षैः ।
आस्तेन किं कपटवेषभृताऽसुरेण
तेषां गतिं च गमितोऽसि गदाग्रपाणे ! ॥१६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लाक्षागृहे प्रबलधूमहुताशदीप्ते
संरक्षिता हि भवता बत भीमसेन ! ।
हा वत्स ! सम्प्रति वयं किमुपेक्षिताः स्मो
नागायुतोद्धतबलेन महाभुजेन ॥१७॥

आः क्रूरकर्मकुटिलाः कुरुराजपुत्राः
श्रुत्वा मदात्मजविनाशमयीं प्रवृत्तिम् ।
अत्र प्रहर्षबहलाः किल केतुमाताः
मैत्रालयं तु परितो नगरं भवन्तः ॥१८॥

जन्मान्तरोपचितपातकजातजातं
ह्येतत्फलं बहु मया परिणामकाले ।
यान्त्या वियोगमनघैस्तनयैरवाप्तं
तद्द्राक् प्रविश्य दहनं शमयामि शोकम् ॥१९॥

बाल्ये पयोधरभवं मम यत्नपीतं
स्फीतं पयः सुखभुवः शिशवो भवद्भिः ।
देयं पयो बत मयैतदघौघवत्या
वत्सा हहाश्रुबहलं च इहाञ्जलिस्थम् ॥२०॥

कुन्ती तथैव रुदती प्रययौ स्रवन्ती
यान्ती च तत्र जनतां खलु दुःखयन्ती ।
दृष्ट्वा स्वहस्तबलतः परितोषितेन
पुंसा चितां विरचितां ज्वलितां समन्तात् ॥२१॥

यावत्प्रवेष्टुमगमत्सभया सती सा
भीमः पपात तरसा किल तावदेनाम् ।
मा मातरेतदशुभं बत कर्म कार्षी-
र्जीवन्ति तेऽत्र तनयाः खलु चेत्यवोचत् ॥२२ युग्मम्

आलिङ्ग्य निर्भरमसौ जनिताश्रुपूरं
सा भीमसेनमनघा जननी तदानीम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पप्रच्छ वत्स ! कुत एव समागतोऽसि
तिष्ठन्त्यमी कुशलिनश्च युधिष्ठिराद्याः ॥२३॥
एवं श्रुते वचसि मातुरतुच्छतुष्टे-
र्मातर्व्रवीमि च पुरा सुखमास्व तावत् ।
अत्रैव यावदहमाशु सुतांस्त्वदीया-
नप्यानयामि तरसेत्यभिधाय वाचम् ॥२४॥
कौतूहलकुलमनं भवनं च देव्याः
शीघ्रं प्रविश्य सगदः स वृकोदरोऽयम् ।
सम्पूज्य वर्णकुसुमैर्ग्रथितैः स्वकीयं
स्कन्धैकदेश्य किल तां प्रतिमामतिष्ठत् ॥२५॥युग्मम् ।
सा मोदकादिकसुधामयखण्डखाद्य-
सत्फेनिकाद्यघृतपक्वमभूरिभोज्यम् ।
पिण्डीभवन्मधुरदुग्धमयं च भक्ष्यं
भुक्त्वा पपौ निकटकुण्डजलं च भीमः ॥२६॥
तत्राभवड्डमरुडिण्डिमशङ्खशृङ्ग-
वाद्यध्वनिर्मुखरयन्ककुभां मुखानि ।
आजग्मतुश्च दनुजाधिपती महृष्टौ
पूर्वोदितौ प्रणतये कुलदेवतानाम् ॥२७॥
अग्रेऽभवत्स्तुतमथ क्षणमृत्युदायि
देव्या गृहं प्रविशतो दनुजाधिपस्य
राज्ञीकुमारपरिचारकबन्धुवर्गा-
न्वितस्य तस्य कुपितान्तकनोदितस्य ॥२८॥
दैत्योऽवदत्किमिति रे कुलदेवताया
नैवोपहारनिवहोऽस्ति पुरश्च कश्चित् ।
इत्थं निशम्य दितिजस्य वचोऽप्यवोचं-
स्तत्पूजका इति विभो ! भवतोऽतिभक्त्या ॥२९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देव्याशितं सकलमेव बलीकृतं त-
द्भक्ष्यं प्रसादपरया त्वरया ततः सः ।
तान्पाण्डवान्निविडनद्धभुजान्भटैर्घै-
राहारयन्मृगपतीनिव पञ्जरस्थान् ॥३०॥ युग्मम् ।
ते चाभ्यधुर्बधकयोधगणास्तदानीं
हस्तोद्यतस्फुरितखड्गभृतो मदान्धाः ।
रे पाण्डवाः स्मरत यो भवतामभीष्टो
देवी च नस्त्वरयति क्षुधितेऽयमेव ॥३१॥
धर्मार्जुनाववदतामथ तौ सुधीरौ
वीरौ धनुर्द्धरवरौ धरणीश्वरौ तान् ।
रे रे स्मराव इह तं हि घनालिनीलि-
रभवद्रुचिरविग्रहमादिदेवम् ॥३२॥
उद्यत्सुदर्शनमहास्त्रभृतण्डमूनु-
विध्वस्तदुर्द्धरदनूजकुलान्धकारम् ।
संक्रुद्धकालविकरालमुखान्तराल-
गच्छत्स्वभक्तगणरक्षणजागरूकम् ॥३३॥
कल्पान्तभैरवमुखादिव भीमवक्त्रा-
द्धुङ्कारआविरभवद्भयकृद्भटानाम् ।
मत्वा स्म भीम इति तं यमलौ ब्रुवाते
आवां स्मराव इह भीमपदाम्बुजे ते ॥३४॥

इति श्रुत्वा माद्रीतनुजवचनं वत्सलतया
गदां भ्रामं भ्रामं भ्रुकुटिकुटिलास्योऽनिलसुतः ।
महासिंहध्वानोन्मुखरगिरिविद्रावितजनो
वदन्संतिष्ठस्वेत्यसुरपतिमत्युद्धतरुषा ॥३५॥
अरे किर्मीर ! त्वं कृतकपटरूपो वटतरौ
जपन्मायामन्त्रं सुरपतिसमान्मोहमनः ।

For Private and Personal Use Only

इत्यन्यतोऽप्यान्ते भुजबलभृतश्चाम्बरज-
नगादेव्यागाराद्धिरिडिपतिर्व्यायतभुजः ॥३६॥

संक्रुद्धा दनुजेन्द्रयोधनिवहा हन्तुं तमभ्यद्रव-
न्नुद्यत्खड्गगदोरुमुद्गरधनुःखड्गादिशूलादिभिः ।
भीमस्तानपि च प्रचण्डगदाघाताभिचूर्णीभव-
द्दृष्ट्वाश्वीयमदान्धहास्तिकचमूचक्रानकार्षीत्क्षणात् ॥३७॥

प्रारब्धोद्धुरसङ्गरं तदधिपं कीरिरुक्मासुरं
प्रोद्यदूर्ध्वगदाविशीर्णवपुषं वीरानन्येकानपि ।
आकृष्टेत्सीदपि बन्धनान्द्रुपदसन्ध्यादिकानां ततो
ऽथाक्षिप्तलागरं चकर्ष परुषं केशेषु शत्रुस्त्रियः ॥३८॥

अथार्जितस्मरदनानि भूर्यभाङ्क्षी
तत्सौधाली रत्नपद्मदीर्घिकाश्च ।
अहापिद्रुचिमदसौ सुरत्नजातं
तस्यारेः प्रसभमथोदधर्ष रामाः ॥३९॥

तदशिवशिवारावश्रावं नृमांसवसारस-
प्रहिलविषजदृध्राली कं विधाय रिपोः पुरम् ।
प्रमुदितघनाः पाण्डोः पुत्रैस्तया च युतोऽम्बया
प्रमदबहलैर्भीमो रेजे तदाभिनन्दितः ॥४०॥

श्रीमद्धन्यजिनेन्द्रनिर्भरनतेः श्रीमालवंशोन्नतेः
श्रीमद्बाहडनन्दनस्य दधतः श्रीमण्डनाख्यां कवेः ।
काव्ये कौरवपाण्डवोदयकथारम्ये कृतौ सद्गुणे
माधुर्ये पृथुकाव्यमण्डन इते सर्गोऽभवत्सप्तमः ॥४१॥

( ८ )

तत्पूर्ववृत्तं कथयन्त एते परस्परं ते प्रहसन्त एव ।
ततो ययुस्तां नगरीमवन्तीं तन्मालवालङ्करणं भवन्तीम् ॥१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमत्प्रासादमालाशिखरशतमहाहेमकुम्भप्रभाभिः
कूले सन्ध्यायमानस्फुरितरुचितडिद्विभ्रमाम्भोदवृन्दाम् ।
अम्भःक्रीडत्कुलस्त्रीघनजघनकुचद्वन्द्वविक्षोभचला-
द्वीचीमालीदीर्घशिप्रापवनसमुत्कम्पिताशामरम्याम् ॥२॥ युग्मम्
जले स्थले वा यदि मुक्तिरेव मृतस्य जन्तोः पुरजित्प्रसादात् ।
कून्याह्वयत्तत्र सनाथताय सौधध्वजां चोलमिषेण दूरात् ॥३॥
शिप्राजलौघे हतपापसङ्घे कृताभिषेका द्विजदत्तरुक्माः ।
पाण्डोः सनाभ्यस्तनुजाः प्रजाभिः स्तुता महाकालमथ प्रणेमुः ॥
इति स्तुवन्ति स्म पृथक्पृथक्च यथामति प्रेमभरान्महेशम् ।
आद्यन्तशून्यं जगदेकनाथं नित्यं जगत्कारणमिन्दुमौलिम् ॥५॥
आक्रन्मन्दरमथ्यमानजलधेः प्रादुर्भवद्दुस्सर-
ज्वालानर्गलकालकूटमपिबः श्रीनीलकण्ठ ! क्षणात् ।
भीतं त्रातुमिदं जगत्किल यतः कारुण्यकल्लोलिनी-
प्राणाधीश ! ततो महेश ! न कथं मां दीनमालोकसे ॥६॥
व्याधं बिल्वतरुस्थितं मृगवधाकाङ्क्षाभवज्जागरं
न्यग्रोधच्छदपातनाद्विरचिताधः स्थास्तु लिङ्गार्चनम् ।
यद्रात्रौ पुरजित्तिथेरघभिदि क्रूरं तमन्वग्रही-
र्मामापन्नमहेश कृपया संभावयारं च तत् ॥७॥
दीनं बालमतिक्षुधाकुलमयं याचन्तमल्पं पयः
संबद्धाग्रहमष्टविग्रह विभो ! सद्भावभाजं त्वयि ।
शम्भो ! यद्युपमन्युमेव तरसा ह्यन्वग्रहीश्चादिथा-
स्तस्मै क्षीरनिधिं ततो नतिमतः स्थाने ममोपेक्षणम् ॥८॥
त्वद्ध्यानं बहुपातकानि दहति त्वत्पादपद्मार्चनं
साम्राज्यश्रियमेव देव दिशति त्वद्वर्णनेन्द्रद्रुमः ।
धत्ते मङ्क्षु महामनोरथफलं त्वज्ज्ञानसूर्योदयो
हन्ति स्फारभवान्धकारममरस्वामिन्महाकाल हे ॥९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हंहो! कालकरालवक्त्र! सकलग्रासाग्रहस्त्यज्यतां
तानेवाशु गृहाण लोभविषयव्यग्रान्धबुद्धीन्सदा।
यः श्वेतक्षितिपं समाधिनिरतं रक्षन्दृशा भस्मसा-
त्त्वां चक्रे शरणागताभयकृतं तं त्वीशमाप्ता वयम् ॥१०॥

नमो भूरिभस्माङ्गरागाय तुभ्यं नमश्चारुगौरीमयूरीघनाय।
फणामण्डलीरत्नरोचिःछटाभृन्महाहीन्द्रविद्योतमानांगदाय ।११।
महार्घौघभङ्गोरुगङ्गोर्मिराजज्जटाभारबद्धेन्दुखण्डाय भूयः।
नमो बिभ्रते विश्वमष्टाभिरेतन्महामूर्तिभिर्भूतधात्रीमुखाभिः ।१२।
सदा वेदवेदान्तवेद्याय तस्मै नमो योगिहृत्पद्मसद्मस्थिताय।
पदद्वन्द्ववन्दारुवृन्दारकाद्यच्युतब्रह्मादिकस्वामिसानुग्रहाय
नमोऽनन्तरूपाय मूर्च्छन्महिम्ने सुधाधामवद्विस्फुरद्दीप्तिभूम्ने
जगत्पापविध्वंसकृद्भूरिनाम्ने लसत्कण्ठलोठत्सुमन्दारदाम्ने १४
अघोराघपञ्चाक्षरीमन्त्रराजप्रजापप्रसक्तात्ममोक्षप्रदाय।
कृपाम्भोधये नित्यरूपाय शश्वन्नमो व्यासवाल्मीकिमुख्यैःस्तुताय
नृमुण्डप्रचण्डाट्टहासातिरौद्रीभवद्विग्रहायान्धकध्वंसकाय।
त्रिशूलाग्रधारामालेलिताय स्वविद्वेषकृद्दक्षयज्ञक्षयाय ॥१६॥
धूर्जटेकर्णोल्लसत्पञ्चवक्त्रीश्रिया निर्जितोदीतसन्ध्याम्बुदाय।
महाताण्डवाडम्बरोड्डामरोद्यज्जटाजूटवाचाटगङ्गाजलाय ॥१७॥
महायोगिनां भागधेयाय संसृत्यकूपारपारीतरीभावुकाय।
जगज्जन्मरक्षाक्षये हेतवेऽलं महादानवाधीश्वराराधिताय ॥१८॥
महायोगिनीचक्रमध्यस्थिताय महृष्यन्महाभूतमालान्विताय।
महाकल्पवृक्षाय भक्तव्रजानां महाकाल! कालान्तकर्त्रे नमोस्तु

पाण्डवैः प्रविजहेऽथ कष्टतः सा पुरीन्द्रनगरी गरीयसी।
कामकान्ततनुभिर्यमान्वितैश्चारुपौरवनिताविलोकितैः ॥२०॥
तत्पुराणपठितं महर्षिभिः सेवितं जगदघौघघस्मरम्।
नर्मदाविमलतोयपावनं पाण्डवा अमरकंकटं ययुः ॥२१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालभीतनरकंकटं विदुर्दारुणं च नरकं विदारयत् ।
यत्र मज्जकमृतोऽपि पातकी मुच्यते किमु पुनर्धर्मी महान् ॥२२॥
यत्र बिभ्राति निवासनिर्वृतिं स्वर्गिणः खलु विहाय तां दिवम् ।
यद्भवोद्भूतनिदाघविक्लवाशेषलोकपथिकज्वरापहम् ॥२३॥
हरितदर्भविराजितपाणयः प्रयतचित्तनकुर्वत मज्जनम् ।
अददत द्रविणं द्विजराजये नृपसुताः स्तुतिमित्यमतन्वत ॥२४॥

स्फुरद्रेवाकावेर्युरुलहरिसंभेदउदय-
तनूत्कम्पं मान्द्यं हिममरुतमुद्भूतदुरितम् ।
नरा ये स्नातास्तान्स्तनपरीरंभसुभगं
सुरस्त्रैगं कम्पोत्तरमभिसरत्येव रुचिरम् ॥२५॥

कावेरीवारिवेगोद्धुरभिदुरमहारौरवारावरेवा
संभेदेऽहः प्रभेदे विगलिततनवः स्नान्ति ये पुण्यभाजः ।
अर्द्धन्त्योङ्कारलिङ्गं ध्रुवमुदितमहाश्रीफलानां द्विनैः
पत्रैःपवित्रैरपि गिरिशगिरौ निर्वृतिं ते लभन्ते ॥२६॥

वैडुर्यहर्म्यवर्येऽकनकमयमहास्तम्भविभ्राजमाने
प्रासादे स्थेयसीदं स्थितमिह भजते भोगमोङ्कारलिङ्गम् ।
भास्वत्कृष्णागुरुनलदभवोद्गन्धिसारङ्गनाभि-
मोदामोदपुष्पप्रकरविलसमरभ्रामरारावरम्यम् ॥२७॥

नित्यं यद्वाज्यमानं कलकलविलसद्रत्नवत्कङ्कणाली-
वाचालीभूतवेश्याकरतलविपजत्तालवृन्तैः प्रसन्नम् ।
सान्द्रैर्मन्द्रैर्मृदङ्गध्वनिभिरातिरसं सेव्यते नर्तकीभि-
र्नृत्यन्तीभिः सरागीकृतयुवतिभिर्हस्तकोल्लासिनीभिः ॥२८॥

अरेवा रेवायाः सुरपुरपुरन्ध्रीजनघन-
स्तनद्वन्द्वाभोगप्रसभपरिरंभैकसुखदम् ।
असत्कं ग्रीष्मोद्यल्लिभवयन्त्राध्वनियतां
नृणामध्वन्यानां प्रणयत जनाः खेददलनम् ॥२९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जलस्था ग्रावाणः खलु यदि यदीयाश्च शिवतां
गता ऋच्छन्त्यर्चां सुरभिसुमनसश्चन्दनमयीम् ।
ततः सोमोद्भूतां भवभयभरोद्भञ्जनकरीं
भजन्तस्तां मर्त्याः कथमिह भवेयुर्न हि सुराः ॥३०॥
मातर्मे कलकन्यके कलिमलप्रक्षालदक्षोदके
नानाम्नायमहागमेज्यचरिते सर्वैः सुरैः सेविते ।
संसारज्वरभारभञ्जनकरप्रस्फारनिर्वाणदे
साधूनां दलपापदे भगवति ! श्रीनर्मदे ! शर्मदे ! ॥३१॥
अये सोमोद्भूते ह्रादिनि जननिध्वस्तदुरिते
प्रशस्ते ब्रह्माद्यैः कलयसितरां कारणगुणान् ।
यतस्त्वत्तोयामृतममरतां मर्त्यनिवहाः
पिबन्तः संप्राप्ता विततजनतातापशमनन् ॥३२॥
श्रयध्वं मे रोधः कुसुमभरसुभ्रद्रुमवनं
कुरुध्वं चाप्लावं पयसि दुरितध्वान्तनहासि ।
उपाध्वं ॐकारं शिवपदमखर्व्यं ननु बुधा
इति ब्रूते रेवा प्रचलितमहोर्मिध्वनिमिषात् ॥३३॥
मखान्कर्तुं नालं विभवरहितत्वादिह च ये
तपांस्येवाशक्ताश्चरितुमपि च क्लेशभरतः ।
महायोगाभ्यासे न पटुमतयोऽनिन्द्रियजितो
भजन्तां मर्त्यास्ते विधुदुहितुरम्भः कलुषभित् ॥३४॥
नमस्तुभ्यं रेवे ! प्रतिपदमहातीर्थविलस-
ज्जलायै व्यासाद्यैः स्तुततममहिम्ने ! शिवनयि ! ।
निमज्जद्दिव्यस्त्रीसदलकगलद्भूरिकुसुम-
स्फुरत्सौरभ्यायै भवभयभरभ्रंशपटवे ॥३५॥
रेवावारि विहारिवारणघटादानच्छटामोदितं
प्रोच्चैर्विन्ध्यगिरिप्रपातपतनप्रध्वानघारोद्धुरम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उद्यद्यौवनवद्वनेचरवधूपीनस्तनास्फालन-
व्याविद्धं बहलोर्मिवातविदलद्व्याधावलीपातकम् ॥३६॥
अस्मिन्पश्चनदे न मज्जनपदे मज्जज्ज्वरापच्छिदे
मार्कण्डेयमहर्षिणाश्रिततटे प्रेङ्खन्महोर्मिच्छटे ।
माघे मासि परास्तरेपसि जना मज्जन्ति ये ते पुन-
र्मातुर्गर्भमिहोल्बणोत्वरणं पश्यन्ति नो जन्तुचित् ॥३७॥

कपिला पिप्पलाज्वालाप्यमरा यत्र रेवया ।
सङ्गता तत्र ये स्नान्ति ते यान्ति त्रिदशालयम् ॥३८॥

ॐकारमोंकारपदैकगम्यं तमक्षरं द्व्यक्षरसार्धचिन्त्यम् ।
वन्दामहे चोपनिषत्सुगीतं ब्रह्मेति यं प्राहुरमी मुनीन्द्राः.
वर्षाग्रीष्महिमर्तुजैर्घनपयःपश्चाग्निशैत्योत्करैः
क्लिष्टं येन तपस्यया निजवपुः शंभो ! भवद्ध्यायिना ।
बाष्पाम्भोऽक्षियुगे हृदि ज्वरभरं काये प्रकम्पं द्विष-
द्योषणां तनुतेऽधिभूमि स नृपीभूय प्रतापीपुमान् ॥४०॥
शैवं लिङ्गमभङ्गभोगभवदं वाराक्षरद्वारया
ये धन्यास्तपयन्ति चन्दनरसासारैस्तुषारीकृते ।
नैदाघं कलयन्ति कालमिह ते सत्तालवृन्तालस-
ल्लोलाक्षीभुजवल्लिवल्गुवलयप्रध्वानि धारागृहे ॥४१॥
देहे भस्मरजो गलेऽस्थिवलयं मौलौ नृमुण्डावलिं
त्वच्चिह्नं कपटेन बिभ्रति विभो ये जीवनार्थं जनाः ।
तेऽपि स्युर्घनसारचन्दनरसा साराङ्गरागान्विता
मुक्ताहारयुताः सुरत्नमुकुटीनिर्भूभवन्मौलयः ॥४२॥
चञ्चच्चन्द्रकलं चलत्फणिमणंदलद्दृप्तहत्कुण्डल
क्षुभ्यन्मूर्द्धधुनीमहोर्मिपटलीप्रक्षालिताभ्रान्तरम् ।
वेल्लत्कृत्तिरणत्कपालवलयं प्रेङ्खज्जटान्तं मुहु-
र्गौरीशंकरं चिरं पुरद्विपोर्नृत्यं शिवं पातु वः ॥४३॥

For Private and Personal Use Only

सानन्दं सच्चिदानन्दं मोक्षदं मोक्षभूमदम् ।
णेमुः पाण्डवाः साम्बाः सर्वे सर्वेश्वरं शिवम् ॥४४॥

अद्राक्षुर्भीमखण्डाह्वयमतनुसरः सागरं तं नवाना-
मोघैः स्रोतस्विनीनां भरितमथ महाशैलसेतूच्चबन्धम् ।
षष्टिक्रोश्यात्तसीमं स्फुरदहिमकरं भूरिवद्धोडुपश्रि
प्रोच्चैश्चालानिमेषमकरनिव नभः पाण्डवाः शोभमानम् ॥४५॥

यद्रोधोवासिपौरप्रवरवरवधूतुङ्गवक्षोजकुम्भ-
प्रक्षोदोद्दंचदंभःप्रबलकलकलोल्लासवद्राजहंसम् ।
चञ्चच्चञ्चरीकप्रकरसरसिजस्फारपारागरागं
सच्चक्रोच्चालवीचीचयजपलमरुद्ध्वस्ततापीध्वनीनम् ॥

शश्वत्पुष्णाति विश्वं सुमधुरिमभरैर्भूतधात्रीरुहाणां
कन्दैर्मूलैः फलैर्वा मधुभिरपि सुधास्पर्द्धिभिस्तुङ्गशृङ्गैः ।
सल्लीगह्वरस्थाः शरणमुपगताश्चारुपादोपसप्ता
रक्षत्राजेव यस्तं कृतितमथ ययुः पाण्डवा विन्ध्यशैलम् ॥४७॥

तत्पतीरतरङ्गारुमधुताराममसिरामागमा
ग्रामा गन्धर्वशालिशालिशहलानूरेक्षमालाकुलाः ।
दृश्यन्ते स्म सरित्तटीपटुघटीयन्त्राम्बुधारोत्पत-
च्चूर्णाणिकणवत्सनीरणदलत्स्वेदद्रवैः पाण्डवैः ॥४८॥

निर्भिन्नोपलशालमूलविगलन्मन्दाकिनीपावनं
योगध्यानशिवैः कृतानशनवयोगीन्द्रबद्धासनम् ।
मध्ये सह्वरभासमानपरमश्रीमज्जटाशंकरं
विन्ध्याद्रेर्ववलरूपमुच्चशिखरं कैलासकूटोपमम् ॥४९॥

नागद्वारमपारसौरभमहाकान्तारभारक्षर-
त्पुष्पौघासवघासवन्मधुकरीस्फारीभवद्गुञ्जितम् ।
उन्मीलन्नवनागवल्लिविषजत्सद्बीजपूरोल्लस-
ज्जम्बीराम्रबणांशुमत्फलवतीरम्यं दधानं वनम् ॥५०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दर्शं दर्शं पाण्डवाःखाण्डवाभं क्रीडारामं नैकवन्याभिरामम् ।
भूयश्चिर्या बिभ्रते स्म प्रमोदं देवैर्जुष्टं श्रीजटामाख्यशंभोः
॥५१॥ कुलकम् ॥

कान्तारभारकुसुमप्रकरावकीर्ण-
परागपुरपरिपूरितरोदसीकः ।
मन्दाकिनीतरलतोयतरङ्गरङ्गो
गौरीपतिं भजति यत्र वनान्तवायुः ॥५२॥

ढक्कामड्डुडुमरडमरुड्डामराडिण्डिमालीः
संबिभ्राणाः प्रबलनिनदध्वानिताद्रीन्द्रकुञ्जाः ।
भक्ता हस्ताकलितरुचिमत्पिच्छवच्छयस्ते
तुम्बाधारेऽभिदधत इमे भक्तपङ्क्तिं प्रणाङ्गाम् ॥५३॥
भक्त्या प्रीतं पुनरपि जटाशङ्करं कारयन्तः
सद्भक्तानाममरतरुवद्वाञ्छितालीः फलन्ताम् ।
यत्राव्यक्तं प्रणवकृपयाप्येव साक्षाद्भवन्तं
स्वालोकेन प्रणतजनताभ्यन्तमुद्भूनयन्ताम् ॥५४॥
अरोहन्ति प्रवरशिखरं घर्मकालाकुलास्या
गीतालापैरपरितापिकीपञ्चमैः पौरवध्वः ।
यत्रोद्गीतत्रिपुरविजयैः प्रीणयन्त्यो जटेशं
देवाधीशं प्रतिशिवनिशं कृतकर्मालिपाशम् ॥५५॥
अजहज्जलं निचलमुष्णताञ्चलं
किल यत्र भास्वनतिदूरवर्ति यत् ।
निहितांश्च तन्दुलकणान्क्षणात्
पचत्यपि हन्ति तापमतुलं निमज्जताम् ॥५६॥

अद्यापि सन्ति पञ्चैव पाण्डवानां महानगाः ।
चक्रुर्या वसतिं यस्मिन्नपास्तोद्धतपातके ॥५७॥
रुचिरयमकबन्धस्रग्धराछन्दसेति

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षितिपतितनयास्ते तुष्टुवुश्चाष्टमूर्त्तिम् ।
प्रविहितनतयस्ते तीर्थजाताभिषेकाः
प्रमुदितमनसस्तं तत्र निर्धूतपापाः ॥५८॥

नयनदहनदग्धोदामकामं निकामं
धृतमधुरिमवामार्द्धाङ्गसप्रेमरामम् ।
अशमयमविरामं सेवितारामसीमं
निगममहिमधाम श्रीजटामं भजामः ॥५९॥

भीमा भीमाथदक्षा त्रिभुवनभुवनाधारभूतारभूता
रामारामातिरूच्यालपनलपनसन्नाभिरामाभिरामा ।
शान्ता शान्ता त्रिशूलप्रहरणहरणा सर्वदा सर्वदात्री
नेत्रीनेत्रीकृताहस्करुचिररुचिर्दीप्यमानाप्यमाना ॥६०॥

वश्याऽवश्यायभूभृदुहितुरहितुराषाड्विलासाविलासा-
ऽनीहानीहारहारप्रकरककरकोज्जंभकाशाभकाशा ।
स्तुत्याऽस्तुत्यागशीलाशुभसितमसितभ्राजमानाजमाना-
नित्याऽनित्यानभक्त्यातनुरतनुरसौभाग्यसौभाग्यदेशी ॥६१॥
युग्मम् ॥

कालीं कालीं विशुद्धां हिमरुचमरुचद्भ्यापिनाकंपिनाकं
भावी भावीति हेत्रं रुचिररुचिरप्रद्भूममालं ममालम् ।
योगं योगं च बिभ्रज्जनभजनभरोद्धूततापंततापं
सद्यः संद्योयतज्यो भवतु भवतुदाभीलताभीलताभित् ॥६२॥

पाता पातालतीव्रं विषमविषमधाघःपुराणः पुराणां
शास्ता शास्तारिवर्गोऽतनुत तनुतातिं भासलीभासलीलाम् ।
कृत्याकृत्यादधत्येद्धबलिमबलिमद्दामदामामदामा
दद्याद्द्यायमीशो धिमहितमहितध्वान्तवारंतवारम् ॥६३॥

राजा राजार्च्चितत्वं वितनुरचिततनुर्व्योमदेहोमदेहः
कीलाकीलाकायोऽविरतविरतहृद्योऽवधूतोवधूतः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वायुर्वायुमदोभूरजनिरजनिभृद्भ्राजते भ्राजतेजा
जन्तौ जन्तौ य आत्मा स भवद् भवदः शंकरः शंकरःस्तात्
लोलोल्लोलौघनृत्यज्जलजलजविभ्रामरालीमराली
मालामालानगङ्गाविलसितलसितोत्कंपवाहं प्रवाहम् ।
शेषाशेषाग्र्यभोगद्युमणिभमणिभोद्भासिताभ्रंसिताभ्र
श्रीकं श्रीकण्ठरम्यं सकलशकलभृद्धूमलेऽधूमलेऽलम् ॥६५॥
भाले भालेक्षणैर्विम्मदनसमदनं मुण्डमालीडमाली-
र्निघ्नान्निघ्नानुकम्पं कलयदकलयज्ज्ञानिदानं निदानम् ।
श्वेता श्वेतान्तकांतं श्रुतिगमनिगमानूह्यमानंह्यमानं
जालंजालंधरादेर्विधुतविधुतरोदात्तमोहंतमोहम् ॥६६॥
विभ्राद्विभ्राजिकैश्यच्छविभवविभवत्साध्वसत्सध्वसच्छि-
दक्षादक्षाभिजेत्रा शमितशमितमोघस्मराघस्मराधि ।
नत्यानत्यागहीनं शमदमशमदद्दानवद्दानवर्द्धि
ब्रह्म ब्रह्मादिभिर्यन्नमसितमसितं सेव्यतां सेव्यतां यत् ॥६७॥
भगिनि यमुने गङ्गासङ्गाद्विकर्त्तनन्दने
दहसि दुरितं पापिष्ठानां त्वमेव विशेषतः ।
अहमिह महानद्याः सङ्गं विहाय निहन्म्यघ-
व्रजमिति मिलत्फेनव्याजप्रहसविकासीनीम् ॥६८॥
मनसि विभवत्स्पर्द्धाभावाज्जनुर्द्वारदारिणी-
मृषिवरनुतां तापीं पापीयसामतिपावनीम् ।
अपि जहुरमी पाण्डोः पुत्रा ययुः कृतशौचमु-
द्दलितदुरितं तीर्थं साक्षान्नृसिंहनिषेवितम् ॥६९॥
पयोष्णीणत्रपापोष्णीभवद्भुवनदेहिनां ।
निर्वापयित्री नद्यस्ति स्नानेऽनन्तफलप्रदा ॥७०॥
तद्वाघपञ्चवाराहक्षेत्रं दुष्कृतदारणम् ।
पयोष्णी विन्ध्यमध्यस्थं पुराणप्रथितं महत् ॥७१॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हासुराणामसुमुक्तकाली: प्राश्नन्नपङ्के मुनिपुङ्गवानाम् ।
वसन्मन:पल्वल एव देव स श्वेतकोल: किल तत्र भाति ॥७२॥

तान्नत्वे तुङ्गशृङ्गस्खलितघनघटामुग्धसन्दिग्धवन्यं
कुञ्जागारेषु गायच्छबरवरवधूगीतरज्यत्कुरङ्गम् ।
क्षुभ्यत्सौरभ्यलुभ्यद्भ्रमरभरनमत्फुल्लमल्लीमतल्ली-
वल्लीसल्लीलभिल्लीभृशरतमणितं सह्यमद्राक्षुरद्रिम् ॥७३॥

त्रैले क्याभयदायिकां द्रविणवद्दैत्येश्वरौद्धाञ्जिकां
स्व ङ्घ्रिप्रह्वजनौघकल्पलतिकां मंत्रावलीभासिकाम् ।
वि य कैरवचन्द्रिकामविरलश्रीकन्दलीकालिका-
मज्ञानोद्दुरश ार्वरमहतये भास्वन्महादीपिकाम् ॥७४॥

ब्रह्मज्ञानसुधौघपानरसिकां संसारविध्वंसिका-
मुद्दद्विष्णुकृपाम्बुपूरनदिकां पापच्छटोच्छेदिकाम् ।
ब्रह्मेशाच्युतशक्रमुख्यदिविषद्दिद्दत्स्तुतिश्रेणिकां
तेऽवन्दन्त नरेश्वरा भगवतीं सर्वेश्वरीं रेणुकाम् ॥७५॥

विरजमरजसस्तत्पापविध्वंसितीर्थं
लवगदनुजदेहोन्मर्दनोपेन्द्रपादात् ।
जनितमहिम जग्मु: पाण्डवा: सप्रभावं
बहलफल्दमुच्चैर्गीयमानं पुराणै: ॥७६॥

दर्शे सोमस्पृशि स्नाता गोमुखोद्धारिगङ्गया ।
संभिन्ने सलिले क्षारे ते तस्य क्षीणरेपस: ॥७७॥

गोदां गोदां गृणन्ति स्म गत्वा कल्लोलमालिनीम् ।
द्दष्टप्रभावतीर्थाली गहनां पाण्डुनन्दना: ॥७८॥

बिभ्रद्भङ्गमभङ्गविग्रहभृतो लोकान्विधत्तेऽपि य-
न्नीचैर्गामि यदूर्ध्वगामिन इमानासवमानानपि ।
यत्कूलस्थलपङ्कजालशबलं द्राक्पङ्कजालच्छिदो
गोदा शंबरसम्बरं चरमदोजक्षज्ज्ञयत्यर्जुनम् ॥७९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्वत्तीरे मृगयुप्रहारविधुरा वातायुगोमायवो
येऽन्तं यान्ति परास्तपापपटलाः कल्लोलमालानिलैः ।
मोदन्ते दिवि देवि गौतमि ! नवं देवत्वमासाद्य ते
वक्ष्योजस्थलखेलनाललनालीलाविलासालसाः ॥८०॥

सेवध्वं मम रोधसी लहरिषु प्रेङ्खोलवेलानिल-
व्याधूतद्रुमपातिपुष्परजसी गाहध्वमम्भो बुधाः ।
अह्नो याध्वमयध्वमुत्तमपदं कल्लोलकोलाहल-
व्याजादित्यलमालपन्त्यघभिदां गोदावरी वः क्रियात् ॥८१॥

दूरे तिष्ठतु दर्शनं तव पुनस्त्वत्कूलवात्यावल-
स्त्वन्नामापि निहन्त्यघानि जगतामास्तां वराद्रिक्रिया ।
मुक्तिं त्वज्जलमज्जनं दिशति चेद्रोधोभिरास्तीर्णकं
तत्त्रैलोक्यकरालकिल्बिषविनाशोद्दामे गौतमि ! ॥८२॥

यद्यध्युर्विविभूषधूर्जटिजटाजूटीकुटीरस्थिका
नाधास्यत्करुणावती भगवती गोदावरी स्वं पदम् ।
उन्माद्यत्कलिकालकिल्बिषविषज्वालावलीभिः कथं
मूर्च्छालानिरवास्यदेव जगती तच्छ्वसौ सर्वतः ॥८३॥

श्रीशैः श्रीशैलउच्चैः शिखरतरुनरोमल्लिकार्जुनाख्या-
माख्यां बिभ्राणमीशं दधदधिकमहाकालोकलोकतोषम् ।
तीर्थं पर्थादिभिश्च प्रबहलफलदं पुष्करं पुष्कराक्षै-
र्दृष्टं नष्टोग्रकष्टं गहनमहिमतत्तद्गयाख्यं पितॄणाम् ॥८४॥

दीप्रकाशप्रकाशादि विप्रभासप्रभासकम् ।
संसारतारकः सोऽपि तारकासुरसूदनः ॥८५॥

अन्यान्यपि च तीर्थानि तैरदृश्यन्त भूतले ।
प्रसिद्धान्यप्रसिद्धानि ददन्ति व्युष्टिमुत्कटाम् ॥८६॥

अन्ध्रा निरन्ध्रपीनस्तनघनजघनाः सुन्दरेन्दीवराक्षी-
स्तिर्यग्बद्धालकान्ताः सुरभिमलयजालेपमाल्याभिरामाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीमद्वासो वसानाः प्रकटकुचतटा निघ्नतीः सत्कटाक्षैः
पश्यन्तः सस्मितास्ता नियमितमनसः पाण्डवास्ते निरीयुः ॥८७॥
विवृतपिहितवक्षोजन्मभाराः सुरूपा
मधुरवचनभङ्ग्या रागिणो मोहयन्त्यः ।
सुललितगमनास्ता ल[illegible]न्ता
मरहठनववध्वो जग्मुरेतान्कटाक्षैः ॥८८॥
एकचक्रनगरं प्रययुस्तत्पाण्डवाः सकलतीर्थचरास्ते ।
यत्र खादतितरां बकरक्षाः प्रत्यहं प्रबल[illegible]नरमेकम् ॥८९॥
श्रीमद्वन्द्यजिनेन्द्रनिर्भरनतेः श्रीमालवंशोन्नतेः
श्रीमद्बाहडनन्दनस्य दधतः श्रीमण्डनाख्यां कवेः ।
काव्ये कौरवपाण्डवोद्भवकथारम्ये कृतौ सद्गुणे
माधुर्ये पृथु काव्यमण्डन इते सर्गोऽभवच्चाष्टमः ॥९०॥

( ९ )

एकचक्रनगरेऽत्र बभ्रमुः पाण्डवा वसतिमाप्तुमिच्छवः ।
शोकविक्लवजनौघसङ्कुले श्रेष्ठभासि धृतमार्गजश्रमाः ॥१॥
लेभिरे विघनविप्रमन्दिरे पुत्रशोकभरदीनमातृके ।
ते स्थितिं किल तयाऽम्बयान्विता दुर्विधोद्धरणधीरबाहवः ॥२॥
एकपुत्रजननी रुरोद सा ब्राह्मणी तनयशोकविक्लवा ।
अद्यमे तनुजमेष राक्षसः सोऽत्स्यतीति दिनमध्यगे रवौ ॥३॥
याचसे प्रतिगृहं त्वमन्वहं यावनालकणकान्धनाधिकान् ।
वर्तनाय खलु साधुमार्गिणं त्वां कथं न सहते हतान्तकः ॥४॥
निष्पचान्नगमचिरात्स्नुषे शुचौ सूनुनाद्य परलोकगामिना ।
भुञ्ज्महे सममनेन रक्षसः पापिनः पतितुमाननान्तरे ॥५॥
खल्वहं पललभुग्बली भवाम्यद्य मोचयितुमात्मनन्दनम् ।
नास्ति मामतिकृशां जरातुरां मांसलं नरमसौ समश्नुते ॥६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इत्युदीक्ष्य रुदतीं द्विजस्त्रियं कुन्त्यवोचदनुकम्पयेति सा ।
दुःखिता रुदितहेतुवेदिनी मा रुदस्त्वमनघे ! वचः शृणु ॥७॥
एक एव तनयोऽस्ति तेऽनघे ! पञ्च सन्ति मम सूनवो यतः ।
त्वं बलीकुरु बलीयसे सुतं रक्षसे स्वसुतमोचनाय तत् ॥८॥
तन्निशम्य वचनं द्विजाङ्गना स्वां विमृज्य नयनाम्बुसन्ततिम् ।
साऽभ्यधादिति च पाण्डुगेहिनीं माभिधा इति पतिव्रतोत्तमे ! ।९।
आर्यिके ! निजकजीवगुप्तये येऽन्यजीवहननं प्रकुर्वते ।
ते पतन्ति निरये तिजूर्तये न ध्रुवा तनुरियं हि देहिनाम् ॥१०॥
घ्नन्ति ये सकलजीवमण्डलं पूजयन्ति खलु लिङ्गमैश्वरम् ।
तोषयन्ति न हि ते महेश्वरं सर्वजीवमयमामनन्ति तम् ॥११॥
मातरेधि ननु जीवपुत्रका भाग्यभागसि हताघसन्तते ! ।
पूर्वजन्मचितपातकव्रजा संत्यजामि निजजीवितं क्षणात् ।।१२॥
तामुवाच पुनरेव पाण्डवोद्भूतिभूमिरनुकम्पयेति सा ।
न प्रमाणवचनं त्वयोदितं ब्राह्मणि ! प्रबलशोकया शृणु ॥१३॥
गोग्रहे शरणगस्य रक्षणे स्वामिनोऽर्थमतिघोरसङ्करे ।
ये समुज्झितनिजासवो नराः प्राप्नुवन्ति खलु ते परां गतिम् ।१४।
स्वं शिबिः पलमदाद्दधीचिरप्यस्थिसञ्चयमसारसंसृतौ ।
सप्रशः कुमुदकुन्दनिर्मलं स्थास्नु च प्रविदधेऽधिविष्टपम् ॥१५॥
अम्बुबुद्बुदवदम्बुदालिवच्छक्रकार्मुकवदिन्द्रजालवत् ।
चञ्चलास्फुरणवन्नभश्चरप्रस्फुरन्नगरवन्महोर्मिवत् ॥१६॥
स्वप्नवच्च मृगतृष्णिकाम्बुवत् क्षुद्रकाद्रिजनदाम्बुपूरवत् ।
पद्मिनीदलगतोदबिन्दुवत्प्रोद्भवद्गगनधूमधामवत् ॥१७॥
सान्ध्यरागवदथोच्चकैरवश्यायविग्रहतमःसमूहवत् ।
कामकेलिकलहाकुलीभवत्कामिनीस्तनविशीर्णहारवत् ॥१८॥
भ्रातृमातृपितृपुत्रबान्धवप्रेयसीप्रभृतयो विभूतयः ।
स्वादवश्च विषया हया गजा भूरयो निमिषभङ्गुरा इमे ॥१९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवमेव मनसा विभावयंश्चिन्तयन्भवहरं हरं हरिम् ।
प्राप्य कायमुपकारकं नरो धर्ममेकमवलम्बते बुधः ॥२०॥
शूलमुद्गरगदोग्रकर्त्तरीहस्तहिंसककृतान्तकिङ्करात् ।
ध्वान्तवातखतप्तलोहजप्रेयसीसमुपगूढभीतिदात् ॥२१॥
क्रन्ददार्त्ततरजीवभैरवाद्रौरवात्प्रबलपातनोच्चयात् ।
बिभ्यतो भृशममी च धार्मिका धूर्जटौ निदधते मनो दृढम् ॥२२॥
तत्समाश्वसिहि विप्रवंशजे ! रक्षितस्तव सुतोह्यसंशयम् ।
न ब्रुवन्त्यनृतमुत्तमा वचो नोच्चलन्ति गिरयश्च जातुचित् ॥२३॥
कुन्तिभोजदुहितुश्च सूनृतामेवमेव गिरमग्रजाङ्गना ।
सा निशम्य निरधारयच्च तन्नन्दनानमरविक्रमान्हृदा ॥२४॥
कुन्त्यवोचदिति भीममाश्रवं प्रश्रयान्वितमुपागतं सुतम् ।
त्वं वृकोदर ! दरं द्विजन्मनो भिन्द्धि राक्षसबलीभविष्यतः ॥२५॥
श्रूयते प्रतिगृहं बकासुरः प्रत्यहं मनुजमेकमत्ति यत् ।
तद्दुरात्मनि हते च नैऋते निर्वृतिं नगरमेष्यति ध्रुवम् ॥२६॥
त्वद्ऋजौ समदशत्रुशातनौ विप्र एष शरणागतो यतः ।
सैव भूतिरिह सद्विपद्भिदा या करोति बलमार्त्तरक्षि यत् ॥२७॥
सोऽभ्यनन्ददर्दसीयभाषितं भीम एष च युधिष्ठिरोऽर्जुनः ।
मद्रराजतनयासुतौ च तौ साध्विदं वचनमुक्तमित्यनः ॥२८॥
विद्यया विजितवादिवृन्दया दोर्बलेन बहुशत्रुशातिना ।
स्पर्शनेन हतयाचकापदा भाग्यभाज इह बिभ्रते श्रियम् ॥२९॥
श्येनवज्जहि बकं बकासुरं जग्धमानुषझषामिषं रुषा ।
भीमसेन ! भुजभीमविक्रमेत्यब्रवीच्च यमनन्दनोऽनुजम् ॥३०॥
सत्वरं नयत रे बुभुक्षितो राक्षसो नरकरं पुराद्बहिः ।
अन्नमाहितमनस्त्वनलपक्वं मानुषैः प्रतिगृहं च याचितम् ॥३१॥
कुञ्जराशनतरौ श्मशानजे क्रोधरक्तनयनः स तिष्ठति ।
इत्थमस्तपवचो निशम्य च क्रागनस्तदधिरूढवान्गदी ॥३२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भीम एष कृतसद्भुजिक्रियो भ्रातरं स्वजननीं प्रणम्य च ।
ब्राह्मणीभयमुदस्य हर्षवान्राक्षसं च तमथैक्षताग्रतः ॥३३॥
दावदग्धखदिराभविग्रहं तालदघ्नचरणद्वयान्वितम् ।
बभ्रुबर्बरकठोरमूर्द्धजं चण्डदंष्ट्रविकटास्यकन्दरम् ॥३४॥
लेलिहानरसनं गलेलुलन्मुण्डमालमतिशातशूलिनम् ।
कालकिङ्करमिवातिभीषणं प्राणिभक्षणपरं दलद्घृणम् ॥३५॥
अन्वगुः पवननन्दनं ततः पौरलोकनिवहा दिदृक्षया ।
धर्मराजतनुजोऽनुजाश्च ते हर्षफुल्लनयनाः सुदूरतः ॥३६॥
उज्जहर्ष बहलं स राक्षसो मांसलं तमुदीक्ष्य शाष्कुलः
उच्चचाल च जिघत्सयोल्ललद्जिह्वया विवृतवक्त्रगह्वरः ॥३७॥
उज्जगर्ज गजराजभञ्जनः स प्रभञ्जनसुतः प्रतापवान् ।
मानवा ह्यबिभरुर्महाभयं स त्रिशूलमुदलासयद्रिपुः ॥३८॥
उद्धृतां निजगदामविभ्रमद्दीप्तहेमवलयामथायसीम् ।
विस्फुरन्निमिषरुग्विलासिनीमाततायिनमुदीक्ष्य वायुजः ॥३९॥
राक्षसः स्वमथ शूलमाक्षिपत् अग्निदीप्तरुचिभीममूर्जितम्
श्रीगदाधरमिवासुरो रुषा तद्बभञ्ज गदया वृकोदरः ॥४०॥
तौ भुजाभुजि भुजोत्कटौ भटौ दुर्द्धरौ विदधतुः क्रुधा मृधम् ।
मुष्टिपातघनघातदुःसहौ कम्पितक्षितितलौ निपाततः ॥४१॥
तं नियोज्य निमिषं रुषं दधत्प्राक्षिपन्नभसि फाल्गुनाऽग्रजः ।
द्राग्जघान गदया दयां जहत्खात्पतन्तमपि स[illegible]तं भुवि ॥४२॥

तमभ्यनन्दन्नथ पाण्डुसूनुं स पौरलोकश्च तदग्रजाद्याः ।
कुन्ती च सा विप्रवधूश्च हृष्टा भुजौ तदीयौ समपूपुजंश्च ॥४३॥
हतस्त्वया यन्नरभक्षकोऽयं स राक्षसः पाण्डव ! बाहुशालिना ।
कृतं निरातङ्कमिदं पुरं तत्स्वस्त्यस्तु तेऽद्येत्यवदज्जनौघः ॥४४॥
समुद्घोषं प्रजौघास्याच्छ्रुत्वैवं च पाण्डवाः ।
पञ्चालराजनगरे याज्ञसेन्याः स्वयंवरः ॥४५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रवर्त्तते दिगन्तेभ्य आगच्छद्भूपमण्डलः ।
इत्युद्धर्षेण पश्चालं पश्चालं चेलुरीश्वराः ॥४६॥

श्रीमद्वन्द्यजिनेन्द्रनिर्भरनतेः श्रीमालवंशोन्नतेः
श्रीमद्वाहडनन्दनस्य दधतः श्रीमण्डनाख्यां कवेः ।
काव्ये कौरवपाण्डवोदयकथारम्ये कृतौ सद्गुणे
माधुर्यं पृथुकाव्यगण्डन इते सर्गोऽष्टमान्त्योऽभवत् ॥४७॥

(१०)

जगदानन्दजनको दाण्डपाता महोत्सवः
अथारब्धसुतोद्वाहं द्रुपदं हर्षयन्नभूत् ॥१॥

उचितरचनाव्यग्रीभवत्पुरसुन्दरी-
पदरणज्झणन्मञ्जरीरालिध्वनन्मणिमेखलः
कनककलशश्रीमत्सौधस्फुरद्ध्वजमण्डलो
मलयजरसासारैः सिक्तक्ष्माघनकर्दमः ॥२॥

सुरभिसुमनोमालागुम्फप्रविह्वबधूजनः
क्वचिदपि कुरङ्गाक्षीगीतानुरक्तमनोमृगः
क्वचनरुचिमद्वारिद्राद्रांशुकप्रविधूननोद्धुर-
वरवधूरंचचोलाञ्चलोल्लासितस्तनः ॥३॥

क्वचन च लसद्गन्धद्रव्यप्रपेषणकैतवा-
नुकृतपुरुषीभूतोन्मत्ताङ्गनारतयौवतः ।
मधुरमुरजध्वानैर्नृत्यच्छिखावलमण्डलः
क्वचन दहनक्षिप्ताक्षुद्रागुरूत्तमसौरभः ॥४॥

विपुलविलसन्मुक्तालीमत्सुतोरणमालिकः
कनकरुचिमत्स्तंभोद्भासिप्रभूषितमण्डपः ।
अधरितरतेर्धृष्टद्युम्नः स्वसुः स्वतनुत्विषा
द्रुपदनगरे जज्ञे भूयान्स्वयंवरडम्बरः ॥५॥ कुलकम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विभ्राजिष्णु विजिष्णु जिष्णुबलवत्सत्तारहारस्फुरत्-
केयूराढ्यकिरीटकुण्डलमणिप्रद्योतविद्योतितम् ।
बिभ्राणं शुककिंशुकांशुकलितं कौशेयमप्यंशुकं
कौसुंभं सुभगं विशेषकमपि श्रीभाजि भालस्थले ॥६॥

हृद्यं मार्गमदं विचित्रसुमनोमाल्यानि सौगन्ध्यव-
न्त्युद्भ्रान्तभ्रमराणि केशनिचये स्निग्धे सुनीलद्युतौ ।
मूर्त्तौ सत्त्वमयक्षकर्दममयीमप्यङ्गरागाश्रितां
जेतुं त्र्यक्षमिवात्तदेहनिवहं कामेन मायाबलात् ॥७॥

रामोपेन्द्रसनाथयादवनृपैः स्फुरत्प्रतापैश्च तैः
सौद्धत्यैर्धृतराष्ट्रनन्दनशतैरध्यासितायामलम् ।
पञ्चालेन्द्रपुराद्बहिष्कृतमहास्थान्यां स्थितं राजकं
बभ्राजे भुजविक्रमोर्जितमहाराजन्यसैन्यान्वितम् ॥८॥

राधायन्त्रं स्थापयामास राजा तस्याधस्तात्तैलपूर्णं कटाहम् ।
यस्मिन्निज्याभेदनीयं भ्रमन्त्या मत्स्याश्चक्षुर्धन्विनाऽधोमुखेन॥९॥

आदिदेश पुरवासिनो जनान्नर्तकांश्च विभवेश्वरोपमः ।
भो तनुध्वमिह फाल्गुनीमहानागतेषु नृपमण्डलेष्विति ॥१०॥

तस्यां सभायां नृपसिंहसङ्घैरुद्भासितायां द्रुपदो न्यषीदत् ।
सभाजितो दैत्यसभाजितेन तेनाच्युतेन प्रमनाः सुपुत्रः ॥११॥

आनद्धध्वननद्धलयवध्यालोलदोर्वल्लयो
वीणावादनतत्परा अपि परा गायन्त्य वोच्चकैः ।
अत्यर्थं हरिणी भविष्णुचरणी वर्त्तिष्णु रोचिष्णु त्वः
कौसुंभानि सुभानि भानि विलसत्सुक्ता वलिव्याजतः ॥१२॥

बिभ्रत्यो जितसान्ध्यरागरुचयश्चूर्णां च बभ्रुद्युति
प्रत्युर्वीपतिसुभ्रुवः सुरभिमन्मुष्ट्या क्षिपन्त्योऽभितः ।
कामं मोहनभस्मवद्विहसितोल्लासयास्यरम्यश्रियः
काश्चिन्नागजपुञ्जपिञ्जररुचः कुर्वन्त्य उर्वीश्वरान् ॥१३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वर्षन्त्यो मलयोद्भवद्रवचयानन्याः कुरङ्गेक्षणा
नार्योऽदभ्रमिताभ्रमुष्टिनिवहैः कर्पूरगौरं हरिम् ।
कुर्वाणाः कुसुमेषुनिर्मलयशः शोभैर्द्विरेफाकुलै-
रास्थान्यां सुरसुन्दरीसमरुचो वाराङ्गना रेमिरे ॥१४॥
अन्तकुलकम् ॥

सलीलकरविभ्रमद्रुचिरदण्डपातस्फुर-
ज्झणज्झणितनूपुरक्वणितहृतपञ्चेषवः ।
सुकेशचयविस्खलत्कुसुमराजयो नृत्तकृ-
त्स्वहस्तवरदण्डभृन्नरकृतोपगूढा मुहुः ॥१५॥
मनोज्ञवदनास्मितं मधुरविभ्रमभ्रूलतं
स्फुरद्वचनभङ्गिभृत्प्रविलसत्कटाक्षच्छटम् ।
सपल्लवलतोल्लसल्ललितबाहुवाराङ्गना
दधत्य उरुरागिणां हृदयहारि रूपं बभुः ॥१६॥ युग्मम् ॥
उग्रसेनमथ मन्मथात्मजं माधवं हलधरं च सात्त्विकम् ।
उद्धवं मदनसंवसारणान्सांगदं गदमपि प्रमोदिनम् ॥१७॥
यादवानपि परांश्च भूरिशो भूपतीन्घनकुतूहलाकुलान् ।
द्रोणविदुरकृपकर्णमुख्यकान्कौरवानथ सुयोधनानुगान् ॥१८॥
तान्परानपि दिगन्तरागतान्भूमिपालनिवहान्मुदान्वितान् ।
यक्षकर्दमचयैः सुगन्धिभिर्बभ्रमद्भ्रमरराजराजिभिः ॥१९॥
सर्वतः सिषिचुरेणचक्षुषः प्राक्षिपंश्च घनसारमक्षिषु ।
तुङ्गपीवरपयोधरस्खलद्वाससश्च परिरेभिरे भृशम् ॥२०॥
चक्रिरे नखविखण्डितानमून्प्रपूर्वमभिरामविग्रहाः ।
दुर्निवाररणवारणच्छटाकुम्भपाटनपटूभवद्भुजाः ॥२१॥
यूयमेव सुकठोरपीवरोरोजयोः सुरत आध्वमद्य नः ।
ऊचिरे चतुरवारयोषितो नर्मवद्द्रुपदराजनोदिताः ॥२२॥
वारविभ्रमवतीपटाञ्चलैर्वीजयन्नृपचयोत्तरीयकम् ।
ग्राम्यभाषणपटूभवद्विटैरावहद्द्रुपदभूपतिर्मुदम् ॥२३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूरुषोत्तममतूतुषत्तदा कौतुकैर्नवनवैश्च मेघवत् ।
भूरिहेमपटरत्नवर्षिणं गायनेषु च वराङ्गनासु च ॥२४॥
राजराजिरपराग्रशिश्रिणच्चीनरत्नवरवाजिसश्चयान् ।
गीतमुख्यबहुसत्कलाविदां कोटिशोरसरहस्यवेदिनी ॥२५॥
वन्दिभिश्च विरुदावली हरेः प्राकृतैर्विरचिता स्म पठ्यते ।
नैकदानवकुलान्तकारिणो लभ्यते स्म हयरत्नसश्चयः ॥२६॥
महानुलूलुध्वनिरात्विरासीत्प्रहर्षभाजां वदनाङ्गनानाम् ।
समं समास्फालितहस्ततालप्रोत्तालनादैश्चकिताश्च वृन्दैः ॥२७॥
सुरभिसुरभिपुष्पैर्गन्धवद्द्रव्यसङ्घै-
रगुरुमृगमदश्रीखण्डकर्पूरमुख्यैः ।
परिमलबहलोऽभूद्भूमिभागः सभाया
विततमधुमहानां भूभुजां साङ्गनानाम् ॥२८॥
विचित्रचीनोत्तमहेमभूषणैर्विराजमाना नरराजमण्डली ।
वसन्तमासाद्य रराज निर्भरं प्रसूनसङ्घैरिव काननस्थली ॥२९॥
सहाप्सरोभिर्विबुधा इवामी विहारवन्तः सुतरां विरेजुः ।
वाराङ्गनाभिर्वरविभ्रमाभिः परःशताभिर्नरदेवसङ्घाः ॥३०॥
अथ द्रुपद आह स्म देवदेवं जनार्दनम् ।
चिन्ताकुलान्तःकरणः प्रश्रयानत इत्यसौ ॥३१॥
सर्वज्ञोऽसि जगन्नाथ ! कृष्ण ! यादवनन्दन !
यदहं वक्तुकामोऽस्मि श्रूयतां तद्वचो मम ॥३२॥
मया दत्ताऽनवद्याङ्गी द्रौपदीयं सुमध्यमा ।
पार्थाय सत्यया वाचा पूर्वं विक्रमशालिने ॥३३॥
एक एव विजेतुं यो नृपसङ्घान्प्रगल्भते
करीन्द्रानिव पारीन्द्रो नक्षत्राणीव भास्करः ॥३४॥
भवानिव बलोद्दृप्तदानवेन्द्रान्मदोद्धतान् ।
तं विना फल्गुनं फल्गु मन्ये सैन्यं महीभुजाम् ॥३५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति च श्रूयते लाक्षागृहे दग्धा हि पाण्डवाः ।
धर्माद्या धर्मधुर्यास्ते कौरवैः क्रूरकर्मभिः ॥३६॥
त्वत्कृपातः कथंचिच्च जीवेयुर्यदि तेऽनघाः ।
कुतश्चिच्च समेष्यन्ति राधायन्त्रं ततः कृतम् ॥३७॥
असौ गांडीवधन्वैव दुर्भेद्यं भेत्तुमर्हति ।
प्रासादाद्धि गुरोराधायन्त्रं नान्यस्तु कश्चन ॥३८॥
ततोऽवदद्वासुदेवः सखा गांडीवधन्वनः ।
जानीहि जीवतो राजन्! धर्मिष्ठान्पाण्डुनन्दनान् ॥३९॥
मय्येव भक्तिप्रवणान्दोर्दण्डोद्दामविक्रमान् ।
इहैनान्योजयिष्यामि त्वया सह नृपोत्तम! ॥४०॥
न कदाचित्कालतोऽपि मद्भक्ता बिभ्रते भयम् ।
सङ्कटेषु हि सर्वेषु जाग्रद्रक्षामि तानहम् ॥४१॥
इति श्रुत्वा हरेर्वाचं द्रुपदो हर्षनिर्भरः ।
अतत्वरत्सभामध्यं प्रापयिष्यन्सुतां सुतम् ॥४२॥
अवोचदिति भूपालान्धृष्टद्युम्नाभिधस्त्व च ।
वरिष्यति स एनां यो राधायन्त्रं विभेत्स्यति ॥४३॥
अथोत्थाय महाबाहुर्धृष्टद्युम्नोऽभ्यधात्तमाम् ।
इत्थं शृणुत भूपालाः सर्वे यूयं महाभुजाः ॥४४॥
उर्ध्वबाहुरधोदृष्टिर्भ्रमन्तीं शफरीं रयात् ।
राधायन्त्रे स्थितां नेत्रे यो भेत्स्यति धनुर्धरः ॥४५॥
तैलापूर्णे कटाहेऽस्मिन्बाणेन प्रतिबिम्बिताम् ।
याज्ञसेन्याः स भर्त्ताऽस्या भविष्यति न संशयः ॥४६॥ कुलकम्
श्वो विधेया सभा भूयः सर्वैरपि नरेश्वरैः ।
मौहूर्त्तिकैर्मुहूर्ते हि कथिते शुभलक्षणे ॥४७॥
अथ नरवरवीरपुङ्गवास्ते द्रुपदनरेन्द्रपुरीमुपेयिवांसः ।
पटुपवनविधूतकेतुदंभात्त्वरितमिमान्नृपतीनिहाह्वयन्तीम् ॥४८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अचकथदथ पाण्डवी सुचेष्टा सपदि च दक्षिणतः पुरः प्रवेशे।
सुयुवतिवरलाभमेषा बहलमुदां निलयेभ्य ईश्वरेभ्यः ॥४९॥
अतिसुभगरवो बभूव तेषां परुषरवोऽपि रासभो यत्।
भजति हि गुणवत्त्वमेव कश्चित्समयमुपेत्य गुणोज्झितोऽपि जन्मी
पुरमपि दिविशुर्विशामधीशा मणिमयतोरणहैमहर्म्यहृद्याम्।
निजरुचिविजिताममरावतीकां सुररमणीरमणीयरुपरामाम् ।५१।
सुघटितघटसङ्घसङ्कुलां तामजिरगतातिविशालशालरम्याम्।
अभिनवतरकुम्भकारशालीमाधिवसति स्म च पश्च पाण्डवीयम्॥
ताम्ररोचिरतितप्तमुपाश्रं हेमगोलमिव कालकलादः।
अक्षिपज्जलनिधौ रविबिम्बं निर्मिमासुरथ विश्वविभूषाम् ॥५३॥

पूर्वाचलेन्द्रशिखरेऽप्युदयं गतोऽसा-
वस्ताचलेन्द्रशिखरेऽस्तमियाय चार्कः।
अत्युच्चकैः खलु पदे महतां प्रतिष्ठा
प्रायेण तुङ्गतर एव भवेद्विनाशः ॥५४॥

परिवृतकटकावानिर्वनान्तैः शिखरगताधिकशोणभानुबिम्बः।
गजमुखमाधि मूर्धना गजौघं चरमगिरिः स जहास नीलभासम्
अथ तिमिरमजृम्भत प्रभूतं स्मरजविकारचयैः समं समन्तात्।
उपवनमिव मन्मथस्य राज्ञश्चलितसवेपथुबन्धकीसमूहम् ॥५६॥
विषयिणि तरुणत्वमायुरर्थं मधुरगिरं वनितां पुरो निधाय।
अतिविततमस्तमालवन्यां हरति च दुर्द्धरमार धूर्त्त एषः ।।५७॥
अविभरुरुडुमण्डलानि नाके मदनभटप्रहितास्त्रलक्षलक्ष्मीम्।
त्रिभुवनविजयोद्यतेऽसमेषौ पिदधदिवार्कमभाद्रजस्तमिस्रम् ।५८।
न सुरभिसुमनस्सु मानसं मे ज्वलति तनुर्घनचन्दनोक्षितापि।
रमयति रजनी न दीर्घयामा प्रियसखि! मामसमेषुबाणबाधाम्
निदधतमपराधमात्मसंस्थं मयि च मृषा परुषाक्षरं वदन्तम्।
द्रुततरमुपगम्य सामवादैरनुनय नाथमिमं निपत्य चाङ्घ्र्योः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रियतममिति चाभिधेहि मुग्धे!
वदसि विभो! रहसि त्वमेवमेताम्।
क्षणमपि न विषोढुमस्मि शक्तः
सह विरहं हरिणेक्षणे! भवत्या ॥६१॥

न वसति हृदये पराऽस्मदीये
रसभरभाजि चिराऽनिशं भवन्तीम्।
तदपि च वचनं मृषाऽभवत्ते
मदनतनो! मम भाग्यवैपरीत्यात् ॥६२॥

अथ तनु रपि चेत्क्षपा त्वदीये मनसि चकास्ति तदेहि मन्दिरं नः।
प्रभव इह भवन्ति दीर्घरोषाः प्रणतिपरे न हि किङ्करेऽपराद्धे ।६३।

अभिदधुरधिदूति नीरजाक्ष्यः
स्फुटमिति दुस्सहकामबाणभिन्नाः।
रसभरसुभगाक्षरं रजन्यां
प्रणयिषु रोषपरेषु कामकेलौ ।६४॥

घनतमतमसि प्रवर्द्धमाने
परिदधतीश्च दुकूलमञ्जनाभम्।
स्तनयुगमृगनाभिगन्ध एवाप्य-
चकथदुन्मदपांसुलाः प्रयान्तीः ॥६५॥

अथ विधुरुदयं व्रजन्विरेजे स्फुरदरुणद्युतिरन्धकारभारे।
लवणजलनिधेर्जले सुनीले विद्रुमरोचिवरेव प्रवालजालम् ।६६।

युवतिजनमनोभिरेव सार्द्धं सपदि तुषारमरीचिरन्वरज्यत्।
सह मदनमहाविकारचारैश्चलितमहोर्मि च चुक्षुभे समुद्रः ॥६७

त्रिनयननयनाञ्चिर्दग्धदेहं यदि
दुर्मदनममृतवर्षैर्जीवयन्त्यंशुभिः स्वैः।
तदनुभवति नूनं स्वप्रभुद्रोहजांहः
फलममितमजस्रं क्षीणतां बिभ्रदङ्के ॥ ६८ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तिमिरमाविशदूघूकैः सार्द्धं गिरीश्वरगह्वरं
सपदि विभेदे कोकः शोकः समं जननिद्रया ।
सह सरसिजैर्विप्रप्राक्प्रक्रियाः प्रचकाशिरे
ऽथ नमसिते भानौ सानौ गिरेरुदयं गते ॥ ६९ ॥
श्रीमद्वन्द्यजिनेन्द्रनिर्भरनतेः श्रीमालवंशोन्नतेः
श्रीमद्बाहडनन्दनस्य दधतः श्रीमण्डनाख्यां कवेः ।
काव्ये कौरवपाण्डवोद्भवकथारम्ये कृतौ सद्गुणे
माधुर्ये पृथुकाव्यमण्डन इते सर्गोऽभवद्विश्रुतः ॥७०॥

( ११ )

जगज्जयायास्त्रमिव स्मरेषोः सा द्रौपदी संसदमाससाद ।
विक्षोभयन्ती वदनेन्दुनाऽथ नानाऽवनीनाथसमूहवार्द्धिम् ॥१॥
ततस्त्रिलोकीललनालिमौलिललामभूतां द्रुपदात्मजां ताम् ।
नेत्रैः पिबन्तः स्मरबाणभिन्नाः संवर्णयांचक्रुरिति क्षितीशाः ॥२॥
अपूर्वाऽसौ सृष्टिर्ध्रुवमिह विधेर्निर्मितवत-
स्त्रिलोक्याश्चारिम्णः परमपरमाणून्हृतवतः ।
तथा ह्येषा योषा मुकुटमणिरप्येति सुषमां
श्रियः शोभाकाष्ठां स्फुरदवयवैरेव दधती ॥३॥
यद्यैक्ष्यन्त मुमुक्षवस्त्रिभुवनव्यामोहिनीं कामिनीं
कामस्यास्त्रमनुत्तमापघनिनीं संसारसौख्यावनीम् ।
एनां चञ्चललोचनामविरलक्लेशं समाधिश्रिता
मुक्तिं तर्हि शिलामयीं जनिभिदां नैवाश्रयिष्यन्निमे ॥
अगण्यलावण्यमयाम्बुपूरे निष्पातुकान्कामिमनोऽनिमेषान् ।
उन्मांथतोऽस्याः स्मरमात्सिकोऽयं समन्ततः संहरति भुजालैः ॥५॥
अद्धा सुमुग्धा मकरध्वजस्य दिव्यौषधिर्मान्त्रिकसत्तमस्य ।
इयं यदालोकनमात्रतोऽपि भजन्ति संमोहममी नरेन्द्राः ॥६॥
पायं पायं वक्त्रपूर्णामृतांशोरस्याः स्फारं कान्तिपीयूषधाराम् ।
सान्द्रामोदाः कामिचक्षुश्चकोराः संतिष्ठन्ते निश्चलास्तृप्तिमन्तः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्निग्धश्यामतमालकाननयुता मत्तालिमालाकुला
श्रीमद्धंसकलापिनीतिलकिनीमोद्यद्रसोमालिनी ।
प्रोन्मीलन्नवमालिकापरिमलप्रोल्लासिनी राजते
कान्तेयं मधुनातिसृष्टमधुरश्रीः सा वनश्रीरिव ॥८॥

कोकद्वन्द्वमिवोच्चकैः कुचयुगं संबिभ्रती भ्रान्तिकृ-
न्नाभ्यावर्त्तवती सविभ्रमलसद्भ्रूभङ्गभङ्गान्विता ।
उन्मीलन्मकरीविलासवसतिः सद्धंसकह्लादिनी
सेयं भाति पतिंवराऽतिरुचिरा स्रोतस्विनीवापरा ॥९॥

निर्दग्धं स्मरभूरुहं हररुषा ह्यङ्कुरयन्ती पुनः
प्रौढं राजकदम्बकं प्रपुलकं स्वालोकतः कुर्वती ।
श्यामा कामिमनोमयूरनिकरं प्रोन्मादयन्ती मुहुः
सेयं भाति नितम्बिनी नयनयोर्दृश्येव कादम्बिनी ॥

सौन्दर्याद्वैतगर्वं नवणहरिवधूस्पर्द्धिनी राजधानी
पञ्चेषूर्वीश्वरस्योज्ज्वलरसतटिनी सर्वसंमोहकर्त्री ।
लभ्या केनापि पुंसा प्रचुरतरतपःश्रेयसा सुन्दरीयं
नेत्राणामुत्सवालीः सदसि वितनुते कौमुदीवेक्ष्यमाणा ॥

आमुक्तमुक्तावलिचारुतारा सदाननेन्दुर्नयनाभिरामा ।
रामात्रियामाचरमासभासा मासात्र चैत्रेण कृतेव भाति ॥१२॥

अहह ! कथमिवैषा लभ्यतेऽस्माभिरस्यां
प्रवरतरनरेन्द्रैर्भासितायां सभायाम् ।
हरहरहरिणाक्षीं प्राप्नुयाम स्वदैवा-
द्यदि तदनिशमस्या हंत दासा भवेम ॥१३॥

मधुरमधरपानं विन्दतेऽस्याः सुजन्मा
विततसुकृतकारी भूतले कोऽपि धन्यः ।
बहुभिरपि च राधायन्त्रमेतद्व्यसाध्यं
निजभुजबलवद्भिः शिक्षितैर्धन्विभिस्तैः ॥१४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वयमपि वनजाक्ष्या दुस्सहाद्विप्रयोगा-
त्क्षणमपि यदमुष्याः शक्नुमो जीवितुं न।
विषमसमरवार्द्धिं मङ्क्षु निर्मथ्य लक्ष्मी
मिव भुजगिरिणे माधवो दुर्द्धरौजाः ॥१५॥

प्रसभमिह सहर्षास्तां वरिष्याम उग्र-
द्विपुलकपुलकाङ्गीं भूरिरागां सकम्पाम्।
स्मितमधुरमुखेन्दुं लज्जितां स्विन्नगात्रीं
रणमरणमथो वा साधु लप्स्यामहे तत् ॥१६॥

अथ च गिरिवरे वा क्षिप्रपातात्प्रपाता-
त्पतनमपि विदध्मः प्राप्तुमेनामनर्घ्याम्।
किमुत मदिरनेत्रां लब्धकामा हुताशे
विधिवदथ च तथ्याथर्वमन्त्रैर्यजामः ॥१७॥

अभिमतवरदात्रीं देवतां वा भजामः
स्ववपुरनलसाद्वा कुर्महे स्वित्प्रयागे।
इति समभिदधाना मादनोन्मादनाद्वा
निखिलनृपतयस्ते मूर्च्छिताः संनिपेतुः ॥१८॥

बलवदसुखभाजश्चेतनां लेभिरे ते
विरहदहनदग्धा दीर्घमप्युच्छ्वसन्तः।
स्वमनसि मृगनेत्रां स्मेरवक्त्रां स्मरन्तः
कथमपि खलु वाचं स्वाश्रितेभ्यो दिशन्तः ॥१९॥

वदनाम्भोजसौरभ्यलुभ्यद्भ्रमरसेविता।
पद्मिनीयं स्फुटं भाति करहाटकमालिनी ॥२०॥

अरुणाधरपल्लवोल्लसन्मृदुबाहाविटपोपशोभिनी।
इयमिन्दुमुखी लतासखीस्तनपुष्पस्तबका चकास्ति च ॥२१॥

वसन्ती राजहंसानां मानसे चारुचक्रमा।
निर्मलोभयपक्षेयं राजहंसीव राजते ॥२२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पृथुलकुचा करजवती सकरकतिलकातिसौरभावासा ।
अतिमृदुलतया युक्ता वनततिरिव राजते कान्ता ॥२३॥
स्फुरद्धाराभिरामासौ भास्वद्धंसकलापिनी ।
विशुद्धगाङ्गेयवती स्वर्गगङ्गेव शोभते ॥२४॥
स्फुरन्महोर्मिकापङ्क्तिः सत्तमालकमालिनी ।
कलितोत्कलिकामाला बाला वेलाऽम्बुधेरिव ॥२५॥
सत्काननामोदयना मदनोन्मादद्वायिनी ।
मत्तालिमालयोपास्या मधुश्रीरिव दृश्यते ॥२६॥
उपात्तलीला कमला हृदयाह्लाददायिनी ।
इन्दिरा मदिराक्षीयं साक्षाद्विद्योततेतराम् ॥२७॥
असौ सरागाम्बरवासिनीवनः सुवासिनी चारुमुखेन्दुहासिनी ।
स्फुरत्सरागाम्बरवासिनी मनः कुरङ्गनेत्रा कुरुते च कामवत् ॥२८॥
अस्याः पादारविन्दे भुवमुपहसतो राजहंसान्नयाते
माधुर्ये शिञ्जितानां कलकलविलसद्रत्नमञ्जीरदम्भात् ।
ऊरुभ्यां कोमलाभ्यां प्रदिमभरलसत्स्तम्भगर्भाश्च रम्भाः
कम्पन्तेऽस्या जिताः किं तपहिमसमयोद्भूतशैत्योष्णिमभ्याम् ॥
बद्धाया मेखलाया बहलकलकलक्वणनास्या नितम्बो
वक्तीत्थं मां निरीक्ष्य प्रसभमपि महायोगिनो मोहभाजः ।
रुच्योऽस्या मध्यमोऽपि त्रिवलिभिरधिकं हृत्तमत्वं च धत्ते
नाभ्यावर्त्तेन युक्तः पतितजनहृशां तन्वता भ्रान्तिमुच्चैः ॥३०॥
पीनोत्तुङ्गस्तनक्रान्तो मध्योऽस्या वलिभिर्धृतः ।
संतिष्ठते दृढोऽन्योऽपि वलिभिर्धार्यते हि यः ॥३१॥
पीनोत्तुङ्गकुचद्वयस्य समतां नैवाश्रयन्ते तरा-
मेतस्याः स्मरराजमङ्गलमहकुम्भाश्रियः शोभिनः ।
माद्यत्कुञ्जरकुम्भबिल्वजफलान्यभिजन्नको शाद्वयः
सौभाग्यं जनमोहनत्वमतुलं लावण्यमेभ्यश्रुतम् ॥३२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कुङ्कुमारुणितावस्याः पीनोन्नतपयोधरौ ।
कुर्वाते स्फारसिन्दूरकुम्भिकुम्भविडम्बनाम् ॥३३॥

कण्ठस्थलीलोलमहेन्द्रनीलहाराहिराजेन सुरक्ष्यमाणौ ।
निधानकुम्भाविव गोपनीयौ स्तनावमुष्याः स्मरपार्थिवस्य ॥३४॥

एषा मारमहाविहारसरसीलावण्यपूर्णोदका
वक्त्राम्भोजवती नितान्तविलसद्वक्षोजकोकद्वया ।
सुभ्रूभङ्गतरङ्गवल्गितलसच्चक्षुश्चलन्मीनिनी
कन्दर्पज्वरभञ्जनी स्मितमिलत्फेना शशाङ्कानना ॥३५॥

वनान्तवातेन धुते वसन्ते लते वृथा नृत्यसि विभ्रमेण ।
भुजैकदेशेन शयेन वास्याः स पल्लवस्ते विजितो विलज्जे ॥३६॥

अहोऽसकीयं वदनं मनोज्ञं विद्योतते शारदपार्वणेन्दुः ।
सदः सरोलोचनकैरवाली विकासिता येन निजावलोकात् ॥३७॥

निजाम्भोजभ्रमाल्लक्ष्मीरस्या वदनमाश्रिता ।
नूनमेतत्ततो धत्ते सुषमामतिशायिनीम् ॥३८॥

कृतान्तोऽत्र कटाक्षोऽस्या मृगाक्ष्या दृश्यते स्फुटम् ।
युवानो यतयो येन पात्यन्ते निकटस्थिताः ॥३९॥

पक्वनारङ्गरागेऽस्याः पोस्फुरीत्यधरेऽमृतम् ।
येन पीतेन जीवन्ति विश्लेषविषमूर्च्छिताः ॥४०॥

कस्तूरीतिलको भाति भालेऽस्या रुचिराकृतौ ।
शारदे पार्वणे चन्द्रे कलङ्क इव मञ्जुलः ॥४१॥

स्मररागमयान्धकारतद्विधालिप्तजनस्य संज्वरम् ।
वदनेन्दुरपूर्व दृश्यते नयनाब्जानि विकासयन्नयम् ॥४२॥

एतस्या हरिणीदृशस्त्रिभुवनोन्मादाय कादम्बरी
कामं कार्मुककामकन्दलसमुल्लासाय कादम्बिनी ।
विश्वाकर्षणमोहनस्ववशताः प्रोद्भावयन्ती क्षणाद्
दृष्टिर्भाति महाप्रभावगहना विद्येव सा त्रैपुरी ॥४३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यमुनोर्मिच्छटाच्छाये विभ्राते सुभ्रुवो भ्रुवौ ।
कामन्दीवरचापस्य लीलां भुवनमोहिनः ॥४४॥

तिलकुसुमसमानाभिर्नासिकास्याश्चकास्ति
स्फरिततरसुतारस्फारमुक्ताफलेन ।
शशधरसविधस्थस्थूलतारोपमेना-
म्बुजरुचि च दधत्या हारि हास्यं सदास्यम् ॥४५॥

स्मररथस्य रथाङ्गमनोहरे स्फुरितरत्नमये श्रुतिकुण्डले ।
कृशतनुर्दधती सुदती भृशं हरति नो हृदयं धृतहृच्छयम् ॥४६॥

कम्बुकण्ठी स्वकण्ठे च सप्तविंशतिमौक्तिकम् ।
धत्ते हारमिवास्येन्दुं ताराः सेवितुमागताः ॥४७॥

भासते केशपाशोऽस्या मुक्ताजालकलापभृत् ।
वेणीमाल्यकाण्र्यवानीघो गङ्गायमुनयोरिव ॥४८॥

सुघनजघनसङ्गाच्छन्यनं यान्ति सर्वे
ष्पाभिदधदिव गाल्यालोलभृङ्गीरवेण ।
रुचिरचिकुरभारो राजतीन्दीवराक्ष्या
भ्रमलबहलनीलोद्भायतस्निग्धकान्तिः ॥४९॥

जपाकुसुमभासुरं रुचिरमम्बरं बिभ्रती
महायमवतां मनांस्यपि विनोदयन्ती मुहुः ।
विभाति वरवर्णिनी हृदयहारिहावावनी
जगज्जयसमुच्चलन्मदनवैजयन्ती सताम् ॥५०॥

उद्दामोन्मादभाजः सकलनृपतयो द्रौपदीं वर्णयन्तो
नैकावस्था विभेजुः स्मरसमततनवो यौवने द्रेकवन्तः ।
यावत्तावत्सदःस्थो द्रुपदनरपतिश्चिन्तयामास दैवा-
दागच्छेयुः कुतश्चिद्यदि भवति शिवं पाण्डवा द्राक्कुदित्थम् ॥५१॥

श्रीमद्रम्यजिनेन्द्रनिर्भरनतेः श्रीमालवंशे मतेः
श्रीमद्वाहडनन्दनस्य दधतः श्रीमण्डनस्यां कवेः ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काव्ये कौरवपाण्डवोदयकथारम्ये कृतौ सद्गुणे
माधुर्ये पृथुकाव्यमण्डन इते सर्गोऽप्ययथैकादशः ॥५२॥

(१२)

विशालभालस्थलशोभमानश्रीद्वारकामृत्तिलकाभिरामाः ।
परिस्फुरद्दर्भपवित्रहस्ताः कषायवासोभिरुपात्तभासः ॥१॥
रणोग्रकर्मारविदारदक्षाः कर्मारयष्टीः पटखण्डबद्धाः ।
कमण्डलूंस्तीर्थजलेन पूर्णान्करैर्दधानाः कलितोपवीताः ॥२॥
संबिभ्रतः कार्पटकस्य वेषं ते क्षत्रधर्मा इव मूर्तिमन्तः ।
अनेकभूपालसमाकुलां तां सभामविक्षन्नथ पाण्डुपुत्राः ॥३॥

अन्त कुलकम् ॥

अमी समुद्राम्बुरधोक्षजं तं विभ्राजमानं बहु यादवेषु ।
अविघ्नसिद्धिं ददतं प्रणामे गुप्तप्रहर्षा मनसा प्रणेमुः ॥४॥
एनान्निरीक्ष्य क्षितिपाः सदस्था इत्यूहमातन्वत विस्मयेन ।
अहो इमे पञ्चहुताशनाः किं विनिह्नुवानाः स्वमहो महिष्ठम् ॥५॥
स्वयंवरं द्रष्टुमुपागताः स्युः केचित्कुतश्चिद्यतयोऽथ वै ते ।
न तेषु दृष्टं तपसा कृशेषु संसम्यमौद्धत्यमपि प्रकृष्टम् ॥६॥
शिलातलस्थूलतानो रसो वा किं लोकपालाः प्रबलौजसोऽमी ।
अभ्यागता ब्राह्मणवेषभाजः स्वयंवरं द्रष्टुमदृष्टपूर्वम् ॥७॥
सङ्गोप्यमानो महिमा निजोऽपि प्रकाशतामेतितमाममीषाम् ।
वेषं च भिक्षोर्भजतां यथैव घनाघनौघैः पिहितो विवस्वान् ॥८॥
कृष्णेऽधिकृष्णं कुरुनन्दने च पाण्डोः सुतानां समपातन्तीं ।
स्नेहार्द्रभावा घनरागपूर्णा रोषारुणा च प्रबभूव दृष्टिः ॥९॥
अद्राक्ष्म भद्रानिह तीर्थसार्थानगण्यपुण्यौघफलप्रदांस्तान् ।
यस्मात्ततोऽस्माभिरदर्शि रत्नमनर्घमेतद्द्रुपदात्मजाख्यम् ॥१०॥

For Private and Personal Use Only

विलोकयतां शारदचन्द्रवक्त्रामिन्दीवराक्षीं नयनाभिरामाम् ।
कुन्तीसुतास्ते कमनीयरूपा बभाषिरेऽन्योन्यमिति महर्षाद् ॥११॥
युग्मम् ॥

रघूद्वहो वेन्दुमतीं मुरारिः स रुक्मिणीं वा भुजशौर्यशाली ।
कृष्णां स्मरत्कृष्णमिहाद्य राधायन्त्रं प्रविध्यैकशरेण धन्वी ॥१२
राजन्यसैन्यं बहुमन्यजन्यमजन्यवद्धन्यगजेन्द्रवृन्दम् ।
विजित्य संख्ये हरिराहरिष्यं यथा पृथानन्दन ते प्रसादात् ॥१३॥
युग्मम् ॥

इत्यर्जुनेनाभिहितां च वाचं सत्यां विविच्याप्यभिनन्द्य धर्मः ।
अध्यास्त तां भूसुरसंसदं स पुरस्कृतः सन्ननुजैः सह स्वैः॥१४॥
विपुस्फुरे बाहुभिरेतदीयैर्वमेतरैस्तैकविरोधिवर्गैः ।
उत्तुङ्गपीनस्तनभाररम्यकृष्णोपगूढं विनिवेदयद्भिः ॥१५॥
सुक्षौमहैमाभरणैर्वियुक्ता अप्युच्चकैः पाण्डुसुता विरेजुः ।
उदारविद्याः प्रवराश्च वीराः किं भूषणैर्बिभ्रति भूरिलक्ष्मीम् ॥१६॥

धृष्टद्युम्नो बभाषे पुनरपि सहसोत्थाय मध्यात्सभाया
भास्वत्केयूररोचिः स्फुरितमथ महाबाहुमुत्क्षिप्य चेत्थम् ।
भो भो मूर्द्धाभिषिक्ताः पृथुलभुजयुगाऽऽविर्भविष्णुप्रतापा
निष्णाताश्चापविद्यास्वनवरतशराभ्यासविज्ञाणुलक्ष्याः ॥१७॥
राधायन्त्रोपरिष्टात्सुघटितशफरीं तैलपूर्णे कटाहे
बिम्बाणां प्रातिबिम्बं रभसरयभरेणोर्ध्वबाहुर्भ्रमन्तीम् ।
योऽधोदृक्वाक्षि हन्याद्धनुषिकृतगुरुश्चक्षुषैकेषुणालं
दुर्लक्ष्ये स क्षितीशः परिणयतुतमां याज्ञसेनीं सुनेत्राम्
॥ १८ ॥ युग्मम् ॥

श्रुत्वा तदीयां सुगभीरवाचं कृष्णानुरागोत्तरला अपीमे ।
दुःसाध्यमेतद्धि धनुर्द्धराणां करोति तस्थुर्निभृता नरेन्द्राः ॥१९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भेत्स्यन्ति मत्सीं खलु चेत्क्षितीशाः
समाश्रितां विष्णुपदुर्ज्जयं माम् ।
लज्जा ममैषेति झषध्वजोऽमून्
जघान बाणैरतितीव्रपातैः ॥२०॥

राधायन्त्रं न विद्धं तैः पार्थिवैः पृथुबाहुभिः ।
द्रौपद्यवस्थया विद्धास्त एव मदनेषुभिः ॥२१॥

पणः कृतो हा द्रुपदेन राज्ञा सुदुष्करोऽयं हरिणेक्षणेयम् ।
सुदुर्लभाऽस्माभिरहो विधात्रा वयं हता केवलमाशयैव ॥२२॥

अलं विलम्बोऽस्त्ववलम्बमानां हस्तेन मालां कमलामलाक्षीम् ।
इमां निरीक्ष्याक्षि कृतार्थयामो मा कोऽपि भेत्सीदिह यन्त्रमत्सीम् ॥

इत्यूचुरन्योन्यममी न मीनध्वजेषुजालैर्विकला नृपालाः ।
न यावदग्रेसहसोदतिष्ठदग्रेभुवां तावदुदग्रवीर्यः ॥२४॥

कपिध्वजो ध्वस्तसमस्तशत्रुरेति ब्रुवन्यन्त्रझषीं भिनद्मि ।
पश्यन्तु सर्वेऽपि धनुर्द्धरास्ते कौतूहलं मेऽवनिनिर्जरस्य ॥२५॥

अथोच्चकैः स्म प्रहसन्ति विप्रा बीभत्सुनिर्भर्त्सनकृद्रुदास्ते ।
मा चापलं ब्राह्मण ! याहि भिक्षो ! भैक्षान्नपुष्टोऽसि निकृष्टबुद्धे !

अनेकधानुष्कधुरीणरुद्धे महासदस्यत्र विकत्थसे त्वम् ।
न लज्जसे चात्मनिवेदनाय करोषि धार्ष्ट्यं धनमाप्तकामः ॥२७॥

तीर्थाटकः सत्करुणान्वितेभ्यो दातृभ्य उर्वीश्वरपुङ्गवेभ्यः ।
विडम्बनामेष्यसि वाडव ! त्वमारोपयिष्यन्ति पिशाचतां च ॥२८॥

सर्वेषु विप्रेष्वपि लोकसङ्घा याहीशवेश्मनि च भोजनाय ।
इति ब्रुवाणान्विगणय्य विप्रान्गाण्डीवधन्वा धनुराददे द्राक् ॥२९॥

चापं चक्रुपि चक्रपाणिचरणद्वन्द्वे नमत्कन्धरे
ऽधिज्यं धन्विधरंधरे कुरुवरे क्रोधोद्धुरे फल्गुने ।
इत्यूहं प्रवितेनिरे नरवराः कोऽयं कषायाम्बरो
विप्रप्राग्रहरो गुरुकृतहरः श्रीभार्गवः किंनरः ॥३०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पिनाकधन्वेव धनुर्दधानः समुद्दिधक्षुस्त्रिपुराणि रोषात् ।
सीतां वरिष्यन्निव रामचन्द्रः स चन्द्रमौलेर्धनुराददानः ॥३१॥
यथार्थवादी तत इत्यवादीददीनवाग्विष्णुपदीतनूजः
संश्रावयन्सर्वकुरूत्तमांस्तान्सुयोधनादीन्वचनं सदःस्थान् ॥३२॥
राजन्! पुरः पश्यसि विभ्रमेवं धनुर्द्धरं दुर्द्धरबाहुवीर्यम् ।
मत्स्यीं विभित्सन्तममुं विशङ्के धनञ्जयं दुर्जयमन्यवीरैः ॥३३॥
स प्रत्यवोचत्प्रकृतोच्चहासः सुयोधनः कौरवकैरवेन्दुः ।
पितामह! त्वन्मनसः प्रमोहप्ररोह एषोऽभिनवः कुतस्त्यः ॥३४॥
पञ्चैव दग्धाः किल पाण्डवास्ते लाक्षालये कर्मवशादवश्यम् ।
प्रत्यक्षमस्माभिरपीक्षितानि ज्वालावदग्धानि वपूंषि तेषाम् ॥३५॥
भीष्मो बभाषे पुनरेनमेनःप्रध्वंसिकर्मा नृपतिसुधर्मा ।
इदं नृपाकर्णय पाण्डवानां प्रायोऽशुभं नैव कदाचिदस्ति ॥३६॥
लीलावताराच्युतपक्षपातध्वस्तापदां धर्मधुरंधराणाम् ।
किं चात्र पञ्चालनृपेण राधायन्त्रं समारोपितमेतदर्थम् ॥३७॥
पार्थं विना कोऽपि भिनत्ति नैतद्धन्त्री त्रिलोक्यामिति चाशयेन ।
पार्थाय पुत्री खलु दत्तपूर्वा मया कुतश्चिद्यत आगतश्चेत् ॥३८॥
वरिष्यतीमां स महाभुजश्च गाण्डीवधन्वा प्रथितप्रतापः ।
अत्रैव तद्रक्ष्यसि कौरवेन्द्र वर्तिष्यते यत्कदनं रणस्य ॥३९॥
ततस्त्रिलोकीकृतिपूर्तिसंहृतीः स्वयं विधाता वसुदेवनन्दनः ।
जगाद सानन्दमिदं जनार्दनोऽप्यलं प्रलम्बघ्नमघौघघस्मरः ॥
आर्याग्रतः पश्यसि सीरपाणे! धनुःसहायं मम तं सखायम् ।
उपस्थितं भेत्तुमिदं हि यन्त्रं कृतप्रणाममपि दूरतोऽपि ॥४१॥
अयं वरीता सुवराङ्गनामिमां प्रविध्य राधां भुजविक्रमोद्धतः ।
अरीन्निहन्ता समरेऽतिदुस्सहानरं तारिता स्फिरसङ्गरार्णवम् ॥
ततः परं वीररसैकसिन्धुः स सिन्धुराजस्य रणे निहन्ता ।
दधद्धनुश्चैककरे परे च शरं गभीरं गिरमित्यभाणीत् ॥४३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भो भो राजन्यसैन्याः शृणुत मम वचश्चापविद्याऽनवद्या-
ऽभ्यासाश्चाभ्यागमेषु प्रबलभुजयुगं ध्वस्तशत्रुप्रतापः ।
नानादिग्भ्यः समेताः सपदि खलु मया विद्धमीक्षध्वमेत-
द्राधायन्त्रं द्विजेनाप्यतिविषमतमं द्रौपदीमप्युदूढाम् ॥४४॥
इति भाषमाणमुरुशौर्यभूषणं पृथुबाहुमायतशिलास्थलोरसम् ।
घनरागपूर्णहृदयेन फल्गुनं निरवर्णयत्सुवरवर्णिनी च तम् ॥४५॥
साश्चर्यं सह मत्सरं सह महोद्धर्षं सकौतूहलं
सावज्ञं प्रकृतोपहासमसकृत्सत्तालिकास्फालनम् ।
भूपालेषु परात्मवर्गमिलितेष्वालोकयत्स्वादरा-
त्कोदण्डे किल संदधे शरमसौ नत्वाऽच्युतं फल्गुनः ॥
य उच्यते कृष्णसखो बलीयान्यश्च त्रिलोकीप्रथितप्रतापः ।
बद्धो मृधे येन पिता मदीयो यस्मै प्रदत्ता जनकेन चाहम् ॥४७॥
एतद्गुणैर्निर्भरतोषितेन मत्स्नेहतो मत्सरमुज्झता च ।
यस्मिन्गुणग्राहिषु सततेन मया निशा यद्विरहेण नीता ॥४८॥
समुद्भवद्दुःसहपुष्पचापसन्तापदुःखं कृतकोमलाङ्ग्या ।
सोऽयं भवेद्भाग्यवशादिदानीं स्वयंवरं मे विनिशम्य जीवन् ॥४९॥
उपागतः किंस्विदिहान्यथा चेत्प्रगल्भतेऽन्यो न हि मत्स्ययन्त्रे ।
अनेकराजन्यसहस्ररुद्धे सुनिश्चलेऽस्मिन्सदसि स्थितेऽपि ॥५०
भृशानुरागं मम चित्तमस्मिन्विधिर्विधाता किमतः परं च ।
देवानुरूपं मम चेति चित्ते सा चिन्तयन्ती सुदती विरेजे ॥५१॥
अन्तकुलकम् ॥

अथोदष्टिश्चोर्ध्वं धनुरथ दधत्सेषुनतिम-
द्भुजाभ्यां भ्राजिष्णुः स्तिमितनयनैर्जिष्णुरभिनत् ।
नृपै राधायन्त्रं सदसि सकलैर्दृष्टमहिमा
क्ष्माधीशाशाभिर्द्रुपदतनया यां सह रयात् ॥५२॥
अथोत्पातं मत्स्यी सुरभिसुमनोवृष्टिरभव-
द्विमानस्थैर्देवैः सपदि विहिता चास्य शिरसि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदा च प्रोद्घुष्यज्जनकरतलास्फालनभवः
प्रणादः संजज्ञे चकिततरवाजीन्द्रनिकरः ॥५३॥
अहह नृपतिपुत्री भिक्षुणाऽसावुदूढा
कृतमनुचितमेतद्दुर्विदग्धेन धात्रा ।
द्रुपदजनपते ! हा कोयमाकस्मिकस्ते
मनसि पटुविषादो निर्मितो सन्निपत्या ॥५४॥
इति जनपदसङ्घोद्घुष्यमाणप्रलापै-
र्विदलितहृदयोऽभूद्द्रौपदीजन्मभूमिः ।
इति च भृशमनिन्दद्दुःखितो धार्तराष्ट्रा-
नहह किमु भवद्भिः पाण्डुपुत्राः प्रदग्धाः ॥५५॥
अमितसुकृतवन्तः स्फीतसौजन्यभाजः
समरभुवि जयन्तः प्रौढराजन्यसैन्यम् ।
क्षितिरिति न च निषिद्धा दुर्णयाद्धार्त्तराष्ट्रा
कृतसुकृतपराभ्यां द्रोण! भीष्म! भवद्भ्याम् ॥५६॥
नियतिविमुखताऽहो ! केयमस्मासु जाता
यदनघगुणपूर्णा पूर्णचन्द्राननाऽसौ ।
अविदितकुलशीलेनामुना भिक्षुकेण
द्रुतमिह परिणीता मत्सुता यन्त्रभेत्रा ॥५७॥
अथाभ्यधाद्दुष्टमतिः स्वनाशं मत्वार्जुनं तं हृदि शङ्कमानः ।
स कौरवेन्द्रो द्रुपदक्षितीश त्वया न देया निजकन्यकेयम् ॥५८॥
अनेकभोगार्हवपुः सुता ते कदन्नभोजी पटखण्डधारी ।
अलं दरिद्रोऽपि च भिक्षुकोऽसाववंशजोऽनास्मृतभूमिशायी ॥५९॥
द्विजन्मवेषं भजते जनानां विधाय दृग्बन्धमनेन विद्धम् ।
न चैव यन्त्रं कपटान्वितेन यतस्ततोऽस्मिन्न हि पात्रताऽस्ति ॥
अनेन पाणिग्रहणं न योग्यं गुणान्वितायाः भवतः सुतायाः ।
उच्छिष्टभोजी खलु सारमेयो न पायसं प्साति सुधान्वसाद्यम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तदद्य कश्चिच्च वरं विमृश्य प्रयच्छ तस्मै गुणशीलभाजे ।
सुतां निबध्नीत तमामिमांश्च पञ्चैव धूर्तान्परितोऽस्य सैन्यैः ॥६२॥
इत्युच्चकैः संसदि तस्य वाचः श्रुत्वा प्रजज्वाल धनञ्जयः सः ।
उद्बोधयन्तीः पुनरेव लाक्षागृहानलोदाहमहापकारम् ॥६३॥
इत्याह क्रोधरक्तेक्षणोऽसौ साधु ब्रूषे कौरवाधीश्वर ! त्वम् ।
राधायन्त्रं मन्यसे चेन्न विद्धं मायित्वान्नः स्यात्कृतं तत्पुनश्च ॥
कापट्यभाजां भवतां पुरस्तात् तथ्या कथाऽसावथवा हठेन ।
हराम्यहं च द्रुपदस्य कन्यां बध्नन्तु मामद्य धनुर्धरास्ते ॥६५॥
अथोदतिष्ठत्सहसा सदस्तः सुयोधनो हस्तगृहीतचापः ।
सभ्रूकुटिश्चेति वदन्क्रुधान्धो रे रे भटाः ! संप्रहरध्वमस्मिन् ॥६६॥

समक्षुभ्यत्तस्माद्भूद्विषमतममध्यः प्रथिमभृ-
त्समुद्यच्छद्वाजिव्रजवहलकल्लोलपटलः ।
पतद्ध्यापोतः प्रचलितगजग्राहगहनः
परिस्फारोदंचच्चमरभरडिण्डीरनिकरः ॥६७॥
परिस्फूर्जत्खड्गस्फुरदुरगसञ्चारविषमः
परिप्रेंखत्सखेटककमठकूटोत्तिराटितः ।
प्रतापैर्वैज्वालैस्तमितरिपुशौर्योष्णकिरण-
स्ततोऽभाक्षीत्क्षोभं प्रबलबलराजन्यजलधिः ॥६८॥
युग्मम् ॥

युधिष्ठिरः सोऽपि वृकोदरश्च माद्रीसुतौ तावपि चापहस्तौ ।
पार्थं परीत्य स्थितवन्त एव युयुत्सवस्ते गुरुरोषरौद्राः ॥६९॥

रे रे मानान्धदुर्योधनकपटपटो दुष्टदुःशासन त्वं
भीष्मद्रोणौ प्रवीणौ धनुषि गिरीशवत्कर्ण रे रे विकर्ण ।
अश्वत्थामन्द्विजन्मन् समरभुवि करे रे निधध्वं धनूंषि
द्रागन्ये ये च सैन्ये द्रुपदनृपसुतामाहराम्येष शौर्यात् ॥
इत्याभाष्य भुजङ्गपुङ्गववृहद्बाहुः पृथानन्दनो
भीमं प्राह महाभुजं त्वमपि भो दुर्वारवीर्यप्रभो ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किर्मीरान्तकरक्षराजतनयां यावद् द्विषः शास्म्यहं
दुर्वृत्तान्निशितैः शरैः क्षतवपुश्च्योतत्नभूलाद्गजः ॥७१॥ युग्मम्
इत्युक्तस्तेन पार्थेन भीमसेनो महाबलः।
विद्राव्य रक्षकान्क्षिप्रं बहून्बाहुयुगायुधः ॥७२॥
जग्राह द्रौपदीं दोष्णि सोत्कम्पां कदलीमिव।
पातोद्धुतां वदन्नित्थं मा भैषीः कमलेक्षणे! ॥७३॥
निर्भया भव भीरु! त्वं पश्य मेऽनुजविक्रमम्।
धर्मेण यमलाभ्यां च युक्तस्तस्थावसाध्वसः ॥७४॥

श्रीमद्वन्द्यजिनेन्द्रनिर्भरनतेः श्रीमालवंशोन्नतेः
श्रीमद्वाहडनन्दनस्य दधतः श्रीमण्डनाख्यां कवेः।
काव्ये कौरवपाण्डवोदयकथारम्ये कृतौ सद्गुणे
माधुर्ये पृथुकाव्यमण्डन इते सर्गोऽभवद्द्वादशः ॥७५॥

(१३)

अथ क्रुद्धः पार्थः शितशरशतैः सैन्यमभिन-
द्धनुर्मुक्तैर्विष्वक्सपदि विदधच्छिन्न ककुभः।
रुजन्द्री राजन्यान्हयगजवदाधोरणभटा-
नसृग्धारापातस्नापितवपुषः क्रन्दनयुषः ॥ १ ॥
उच्चैश्चारुविचित्रचापरुचिमत्पर्णैः प्रवर्षाकृतो-
गर्जाडम्बरवद्घनाघनघनासारैः सुराधीश्वरान्।
पार्थोऽशिक्षित किंनु कार्मुकमहाविद्यां स्वहेतोरसौ
बाणैः समपूपुरदुरुतरैराशाम्बराभ्यन्तरम् ॥२॥
विद्राणा हरिणा इवाप्यशरणा विद्वेषणानां गणाः
केचिद्धीरव एव फेरव इवान्येऽद्रीनुपादुद्रुवन्।
मूढाहा इव सैनिकाः कुरुपतेर्युद्धं परं चक्रिरे
संभूयैव धनञ्जये शरचयं क्रोधोद्धते वर्षति ॥३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उड्डीनः शकुनिर्यथैव शकुनिः कर्णोऽपि गोकर्णव-
त्तूर्णं व्यद्रवदद्रिगह्वरमगाच्छल्योऽपि शल्योपमः ।
भ्रातृव्यूः शलभैरिवाशु विजहौ दुर्योधनो योधनं
कर्तुं न क्षमपद्रवद्भुजभृतां दुःशासनः शासनम् ॥४॥

आसीद्बाणमयं नभो भटशिरःश्रेणीमयं भूतलं
त्रैलोक्यं च यशोमयं स भवत्पार्थे धनुर्बिभ्रति ।
स्फीतास्रैः स्थगिता भुवः क्षितिभुजां युद्धाजिरभ्राजिनां
तन्नारीनयनोत्पलान्युदभवन्नप्युग्रबाष्पोज्जसि ॥५॥

कृष्णोद्भूढा मयेयं रुचिरतरतनुर्बाणनिर्भिन्नराधा-
यन्त्रेणाशु क्षताशाः कथमिव हि रणाद् भूभुजो यान्तु वेश्म ।
कारुण्याद्रेति पार्थस्त्रिदशमृगदृशां पाणिपङ्केरुहाणि
प्रोद्धृष्यल्लोमवाद्यध्वनिभृति समरेऽजिग्रहद्धीरवर्यान् ॥

कुप्यद्धनञ्जयधनुष्प्रपतन्निशात-
बाणावलिक्षतवपुःक्षरदस्रधाराः ।
युद्धाजिरे शुशुभिरे वरवारणास्ते
शैला इवात्तकरधातुभवद्द्रवौघाः ॥७॥

ये पार्थबाणाः प्रथमं निपेतुः सैन्ये कुरूणामधिपस्य तस्य ।
स्वदुर्णयात्तद्गृहमेष्यतस्ते यमस्य दूताः किल संबभूवुः ॥८॥
क्रुद्धपार्थधनुषो विनिस्सरत्तीक्ष्णमार्गणगणेन खण्डिताः ।
केतवोऽरुगरुचेऽपतत्क्षितावुल्कया सममनिष्टशंसिनः ॥९॥

चलितरथतरीकासद्द्विपद्वीपभूमि-
स्त्रुटितनृपतिमूर्द्धाम्भोजखण्डा बभासे ।
स्फुरितचमरफेना प्रोल्लसद्वर्मकूर्मा
रणरुधिरधुनीद्राक्तं पतत्यत्र रौद्रा ॥१०॥

अथाब्रवीत्कर्णमसौ विवर्णवक्त्रः कुरूणां पतिरेवमेषः ।
सखे ! विजानासि कृतं सगोप्यं कर्मेदमस्माभिरतीवघोरम् ॥११॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यत्पाण्डवेष्वाजेवसंयुतेषु लाक्षागृहप्लोषणलक्षणं च ।
जीवन्ति दैवस्य वशात्तदद्य यतिष्यामहे चेत्सह पाण्डुपुत्रैः ॥१३॥
निन्दां करिष्यत्ययमेव लोकोऽस्माकं च तत्कर्मविधायकानः ।
वक्तेत्यतः साधु च साधयामः स्वाण्डलं तत्प्रचलन्तु चम्वः ॥

इत्युक्त्वा गतवति राज्ञि कौरवाणा-
मन्विते बलजलराशिना स्वदेशम् ।
अन्यस्मिन्नपि निखिलावनीशवृन्दे
लक्ष्मीशोऽस्थित किल पाण्डुनन्दनानाम् ॥१४॥

अश्रान्तं स्वचरणपद्मचिन्तकानां
साधूनां सुकृतविलासिमानसानाम् ।
उत्कण्ठामपि दधतां तदा च लोके
कारुण्याम्बुधिरिह भूर्यनुग्रहाय ॥१५॥

पार्थः पराक्रमनिधिः पुनराजगाम
धाम स्वमुद्धतबलानि विजित्य वेगात् ।
विद्विषिणां प्रचुरपौरनिरीक्ष्यमाणः
सभातृकः सह तया द्रुपदस्य पुत्र्या ॥१६॥

पश्यन्मुहुर्मुहुरसौ मुखमिन्दुमुख्याः
पार्थः किमेष किमुवाऽवनिदेव एव ।
इत्युल्लसद्बहुविषादसमाकुलत्वा-
न्नातिप्रसादमरविन्ददलेक्षणायाः ॥१७॥ युग्मम् ॥

उद्यत्प्रहर्षबहलाः किल पाण्डवास्ते
कैलासनालयमलङ्कृतवन्त एव ।
मध्येगृहं स्थितिमतीं जननीं बहिष्ठाः
प्रपच्छुरित्थमनघां किमपीह मातः ॥१८॥
वस्त्वाहृतं किमपि किं करवाम शीघ्रं
श्रुत्वैतदीयवचनानि पतिव्रताऽथ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संभुज्य तां ननु विभज्य सुताः किलैत-
त्सत्यामभापततमामिति भारती सा ॥१९॥
दृष्ट्वा च तां कमलपत्रविशालनेत्रां
शालीनतामभजतातिविलज्जमाना ।
हा धिङ्मया किमिदमुक्तमिति प्रवृद्धचिन्ताः-
ऽभवन्न हि वचो मम चान्यथा स्यात् ॥२०॥
श्वश्रूमवन्दततमां विनयान्विता सा
पञ्चालराजतनयाऽभिहितार्जुनेन ।
वीरप्रसूर्भव कुलाभरणं स्नुषे ! त्वं
जातासि नो निलयलक्ष्मि सुलक्षणाढ्ये ॥२१॥
इत्थं वधूं समभिनन्द्य निवेश्य चाङ्के
पप्रच्छ पाण्डुगृहिणी तनयानथैवम् ।
हे धर्मनन्दन वृकोदर सव्यसाचि-
न्माद्रीसुतौ कथयतात्र कथं कुतस्त्या ॥२२॥
आसादितेयमचिराद्रुचिराचिरिंटी
युष्माभिरिन्दुवदना नयनाभिरामा ।
धर्मोऽभ्यधादिति वचोऽम्ब ! विभिद्य राधा-
यन्त्रं विजित्य युधि दुर्द्धरराजचक्रम् ॥२३॥
आनीयतेयममुना बलिनाऽर्जुनेन
पञ्चालराजतनया कमलालया श्रीः ।
माता निशम्य गिरमस्य गुरुप्रहर्षा
साऽभूत्प्रसन्नवदना द्रुपदात्मजा च ॥२४॥
अभ्याजगाम भगवान्बलभद्रयुक्तो
धर्मं दिदृक्षुरथ मन्मथजन्मभूमिः ।
स द्रौपदी जननि निदानमसौ स धृष्ट-
द्युम्नश्चरैश्च विनिवेदितपार्थशौर्यः ॥२५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लक्ष्मीपतिं तमभियातमुदीक्ष्य पाण्डोः
पुत्राः पवित्रचरितास्तमधुः प्रहर्षम् ।
योऽथ चकार भुजविक्रमवन्नरेन्द्र-
निर्माय लब्धललनोत्थमहाप्रमोदम् ॥२६॥

राजासनात्सनदातिष्ठदसावजात-
शत्रुः प्रहर्षबहलो बलमालिलिङ्ग ।
तेनाभिवन्दितपदः प्रथमं ततोऽजं
तं सस्वजे स्वजननिर्भरसौहृदं सः ॥२७॥

तीर्थावलिभ्रमणभूरि परिश्रमं स
प्रोज्झांचकार मुरजित्परिरम्भसौख्यात् ।
नामग्रहणेन यस्य दलन्ति तापाः
पुंसां पुनः किमु तदीयतनूपगूढम् ॥२८॥

तालध्वजं स च कपिध्वज एव ताव-
दालिङ्ग्य निर्भररसं स्वररोरसं च ।
नत्वा विलोचनगलज्जलबिन्दुजालः
पर्यालिलिङ्ग कमलापतिमात्तसख्यम् ॥२९॥

इत्यदशामुपगताः समुपेक्षिताः किं
कृष्ण त्वया स्वचरणप्रणया वयं स्मः ।
रात्रौ दिवा च भवने पथि भोजने च
रन्योत्सवेऽपि हि भवन्तमनुस्मरामः ॥३०॥

सप्रेमनिर्भरमजः परिरभ्य भीमं
रामोऽपि मद्रतनयात्मजयौ नमन्तौ ।
पञ्चालराजमपि तैस्तनयं तदीयं
पाण्डोः सुतैश्च सह योजयतः स्म तौ च ॥३१॥

अन्योऽन्यमेव च यथार्हममी महान्त-
स्ते संप्रणेमुरनघामथ तां पृथां च ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अभ्यासता प्रतिमहे मम हासनानि
प्रोद्दामसन्मदधुनधुजिद्ग्रजश्च ॥३२॥

कृष्णोऽभ्यधत्त स विहस्य वचस्तमित्थं
भीमाग्रजं नरपते ननु पश्य पार्थः ।
प्रामिच्छुमेव सततं भवतां शिवानि
मन्वसयन्तमहितान्धृतसौहृदं च ॥३३॥

दुःखर्दितो भृशमुपालभते सखा मे
धर्मस्ततोऽभ्यधित स प्रहसन्वचश्च ।
सत्यं प्रवच्मि भगवन्! भवतः कृपातो
वर्त्तामहे ह्युपरि सर्वमहीभृतां च ॥३४॥

हंसि त्वमेव सकलानहितव्रजान्नः
किं चाम्बयेति वचनं ह्यविचारयन्त्या ।
प्रोक्तं च सत्यवचसा प्रविभज्य पुत्रा
वस्तूपभुङ्क्त खलु यत्परिलब्धमत्र ॥३५॥

सर्वैर्भवद्भिरनवेक्ष्य वधूमिमां च
तद्ब्रूहि धर्ममिह धर्मविदां वरेण्य!
कृष्णोऽभ्यभाषततमां निखिलागमाली-
निष्पादकः सकलविद्वचनं विचार्य ॥३६॥

राजन्ब्रवीमि मनसा प्रविमृश्य धर्मं
पञ्चैव पङ्कजदृशः पतयो भवन्तः ।
अस्या भवन्तु सुतरां पतिदेवताया
वर्तध्वमुज्झितविरोधमहो मिथश्च ॥३७॥

भूतं भवच्च किल भावि च वेद्मि सर्वं
यस्मात्ततो वचसि मे न विचारणीयम् ।
एवं निशम्य वचनं श्रुतिगीतकीर्त्तेः
कृष्णस्य पाण्डुतनया ह्यभिलेषुरेनाम् ॥३८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ प्रमदनिर्भरो द्रुपदभूपतिः पाण्डवा-
न्प्रवेश्य निजमन्दिरं रुचिरतोरणोद्भासुरम् ।
अजिग्रहदसौ यथाविधि करं सुतायाः सुधीः
पुरोहितसुशिक्षितो जनितमञ्जुवाद्यध्वनि ॥३९॥

अदत्त स च कूकुदो द्विरदवाजिरत्नोच्चयं
कठोरवरपीवरस्तनभरा भुजिष्या अपि ।
युधिष्ठिरवृकोदरार्जुनयमेभ्य एभ्योऽधिकं
तमच्युतमथार्चिचत्सह बलेन सार्द्धं नृपैः ॥४०॥

श्रीकुन्तिभोजदुहितुः स्वसुतामथाङ्के
धृत्वा सगद्गदगलो बहलाश्रुवर्षी ।
एषाऽस्मदीयकुलजीवितमम्ब ! वत्सा
पाल्या त्वया सकृपयेत्यवदन्नरेन्द्रः ॥४१॥

अथ सुललितलास्यं लासिकानां सदःस्थः
सह भरतभवैस्तैस्तेन चाप्यच्युतेन
द्रुपदनरवरोऽसौ प्रेक्षमाणश्च तासां
कनकमणिविभूषा क्षौमवृन्दं विलेभे ॥४२॥

व्यशिश्रणद्भूरिवसुद्विजेभ्यः सत्याशिषश्च प्रददद्भ्य एषः ।
संस्तूयमानो बहुबन्दिवृन्दैर्धर्मो बभौ लब्धघनैः सभायाम् ॥४३॥

तैः पञ्चभिर्भर्तृभिरायताक्षी सा याज्ञसेनी सुतरां विरेजे ।
बुद्धीन्द्रियैर्वर्ष्मणि विस्फुरद्भिः समन्विता कुण्डलिनीव शक्तिः

बहलमहर्षमथतद्बभौ पुरं
विलसद्विचित्रघनचीनभूषणम् ।
मधुरान्नपानजनितोरुतर्पणं
द्रुपदप्रसादमधिगम्य सर्वतः ॥४५॥

द्रुपदात्मजामुखममी मुहुर्मुहु-
र्विलसद्विलोलनयनाञ्चलं नृपाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



परिपाटलैः पुटमिन्दुसुन्दरं
परिपीय तृप्तिमभजन्न भूयसीम् ॥ ४६॥
पञ्चेव पञ्चेषुशरा बभूवुस्ते
सार्थकाः पञ्चसु पाण्डवेषु ।
रागान्वितेषु द्रुपदात्मजायां
विलासवत्यां स्मरराजधान्याम् ॥४७॥
पञ्चालराजेन च पाण्डवैश्च लक्ष्मीपतिर्निर्भरमर्चितः सन् ।
प्रसन्नरूपो वच इत्यवोचद्वरं वृणीध्वं नरदेवदेवाः ॥४८॥
ततोऽञ्जलीन्मौलिषु धारयन्तः स्फारं स्तुवन्तः कलितावतारम् ।
तं सन्नमन्तो वसुदेवसूनुं ययाचिरे भूपतयस्त एवम् ॥४९॥
पर्जन्यः कामवर्षी प्रभवतु भगवन्भूतले भूयसीयं
भूयाल्लक्ष्मीर्विपश्चिन्निवहभवनगा भक्तिरद्वैतवादा ।
त्वय्येवास्माकमस्तु त्वदीयचरणाम्भोजभृङ्गायमाणे
माभूद्भीतिः कृतान्ताद्विरुजि तनुयुजि श्रीपते! त्वत्प्रसादात्
एवं स्तादित्युदीर्य त्वरितमथ हरिर्द्वारकां स प्रतस्थे
कृष्णेनादिष्टपूर्वा कथितनिजविपद्व्रातवृत्तान्तसङ्घाः ।
पाञ्चालाधीश्वरेण प्रमुदितमनसाऽन्वीयमानाः प्रहर्षाः
पाण्डोः पुत्राः सभार्या नगरमभिययुर्निर्भया हस्तिनाख्यम् ॥
महाजिनं वृषाधीशं वीतरागं जितस्मरम् ।
सदाशुभसितं वन्दे सर्वदैवतमीश्वरम् ॥५२॥
अस्त्येतन्मण्डपाख्यं प्रथितमरिचमूदुर्ग्रहं दुर्गमुच्चै-
र्यस्मिन्नालमसाहिर्निवसति बलवान्दुःसहः पार्थिवानाम् ।
यच्छौर्यैरंमन्दो प्रबलधरणिभृत्सैन्यवन्याभिपाती
शत्रुस्त्रीबाष्पवृष्ट्याऽप्यधिकतरमहो दीप्यते सिच्यमानः ॥५३॥
श्रीमज्झंझणनन्दना हि षडिमे श्री चाहडो बाहडः
स्तुत्यो देहडसंज्ञकश्च गुणवान्पद्मस्स आल्हाह्वयः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लक्ष्मीवानपि पाहुराज इति यो जैनेन्द्रधर्माश्रितः
कोलाभक्षनृपात्तलोकनिवहांस्तेऽमोचयन्धार्मिकाः ॥५४॥
श्रीमद्बाहडनन्दनः समधरोऽभूद्भाग्यवान्सद्गुणो-
स्त्येतस्यावरजो रजोविरहितो भूमण्डनं मण्डनः ।
श्रीमान्सोनगिरान्वयः खरतरः श्रीमालवंशोद्भवः
सोऽकार्षीत्किलकाव्यमण्डनमिदं विद्वत्कवीन्द्रप्रियः ॥५५॥
श्रीमद्वन्द्यजिनेन्द्रनिर्भरनतेः श्रीमालवंशोन्नतेः
श्रीमद्बाहणनन्दनस्य दधतः श्रीमण्डनाख्यां कवेः ।
काव्ये कौरवपाण्डवोदयकथारम्ये कृतौ सद्गुणे
माधुर्ये पृथुकाव्यमण्डन इते सर्गः परो द्वादशात् ॥५६॥

ग्रंथ संख्या श्लोक १२५० लखितं संवत् १५०४ वर्षे शाके १३६९ प्रवर्त्तमाने षष्ट्यब्दमध्ये श्रीमुखनाम्नि संवत्सरे दक्षिणायने वर्षाऋतौ भाद्रशुदि ५ पञ्चम्यां तिथौ बुधदिने पुस्तकमलेखि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

ॐ अर्हम्

श्रीहेमचन्द्राचार्यग्रन्थावली.

# श्रीशृङ्गारमण्डनम्

मण्डनग्रन्थाङ्कः ६

जीयाज्जगत्यत्र जडानुपेतः स कोऽपि शृङ्गाररसाम्बुराशिः ।
आकण्ठमाचामति नीलकण्ठो यद्गाहने गौर्यधरामृतानि ॥१॥
जानन्ति यस्यास्यसरोजराजो वेदान्तवादं मकरन्दमाशाः ।
स किङ्करोऽकारि कुरङ्गदृष्ट्यैनाप्यनङ्गो जयतात् तावत् ॥२॥
जगन्ति जेतुश्च जयन्त्यमोघमस्त्रं स्त्रियः स्त्रीकृतशूलपाणेः ।
अर्द्धेन शृङ्गाररसप्रणीतब्रह्मैकतानोपमितेः स्मरस्य ॥३॥
कवयो नवयोजनाविदः कति सन्तीह च भूतलेऽखिले ।
रसिकोरसि कोऽपि कोविदः कुरुते चारुचमत्कृतिं कृती ॥४॥
विलासहासेक्षणभूषणानि क्रीडापरीरम्भणभाषणानि ।
तान्येव तासामसितभ्रुवां किं न स्युर्नवीनानि गिरा कवीनाम् ॥
सदारम्भासमानश्रीरालिङ्ग्या श्रीफलस्तनी ।
यतो रम्भापरीरम्भाः संभाव्यन्ते मुदे दिवि ॥६॥
सारङ्गनयनासारं संसारं के न जानन्ति ।
यत्सेवयाऽधिगम्येत ब्रह्मानन्दाद्वयोदयम् ॥७॥
विश्वं यस्य वशंवदं त्रिभुवनोत्संसर्पिदर्पोन्नतेः
कन्दर्पस्य विलोललोचनचलप्रान्तप्रवृत्तिः स्मरः ।
यस्याः सोऽपि कलाविलासविततेस्तस्याः कटाक्षच्छटा-
विक्षेपक्षमवक्षसं विजयिनं जाने पुमांसं परम् ॥८॥
.... .... .... .... ....भ्रूभङ्ग पुनः ।
........ ........ ........ ........ ........
अस्याः कोऽप्ययमित्यवेत्य तदहो धन्या वयं नाकिनां
सङ्कल्पो न मृषा भवेच्च बलवान्नोपेक्षते स्वं प्रभुः ॥९॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सदादर्शो दृश्यो युवजनमुखाम्भोरुहकुलं
सहासं संतन्वन्नलमखिलदोषात्ययरुचिः ।
समुद्वेलानन्दाम्बुधिमधि परिप्लावितजग-
न्नवीनस्तन्वङ्ग्या विशदवदनेन्दुर्विजयते ॥१०॥

सुमुखीमुखवारिजन्मना स्मितभाजा युवलोचनालिनः ।
यदहो बहुशो बबन्धिरे तदिहान्धकरणं स्मरव्रतम् ॥११॥

स्मरमोहमयीममी तमीं तमसस्तोममुचा रुचा कचाः ।
रचयन्त्यतिविस्तरं दिनं वदनेन्दुद्युतयो मृगीदृशः ॥१२॥

हरिणीसदृशा दृशाच्छवपि नीत्वा विपिने निवेशिता ।
तपतस्तपनस्य तेन सा सलिलानीप्सति नाम धामनि ॥१३॥

अनिमिषैः समिषैरपि लोचनैर्मृगदृशामिह यः परिपीयते ।
तममृतं सुकृतैः प्रतितो भृतं कथयतामसृतं तदपाकृतम् ॥१४॥

जानन्तु यदि जानन्ति देवा एवान्तरं द्वयोः ।
प्रेयसीभिः प्रियालापात्पीयूषं न पुनः पृथक् ॥१५॥

सच्छायः सुरसाल एष सुदतीलोको भुजावल्लरी
लोलश्रीरधरप्रवाललसितः पत्रावलीलीलया ।
शालीसद्द्विजराजिराजिततरः पीनस्तनश्रीफलः
शश्वद्यस्य वशंवदोऽस्ति सुरतेऽस्याकाङ्क्षते तेन किम् ॥१५॥

रतिरतिपत्योः क्रीडाकनकगिरी कामिनिकुचद्वन्द्वम् ।
यौवनविधिना विहिताविह मेयं पश्यतोऽग्रतः किं स्यात् ॥१७॥

तीर्थं मन्मथदैवतं शुचिरसस्रोतस्विनी संनम-
न्नाभ्यावर्त्तवती घनोन्नतकुचोपासीनचक्रद्वया ।
लावण्यत्रिवलीतरङ्गविलसद्रोमावलीशैवला
बालाऽऽविष्कुरुते दृगञ्चलचलन्मीना नदी नादरम् ॥१८॥

इदमुरुयुगलजनने कदलीकरणं कृता न केनापि ।
यदकदलीकरणं स्मरतप्तानामत्र दृश्यते सुदृशि ! ॥१९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दृष्ट्वा रम्भामनयो रम्भास्तम्भान्वितेति नो चलति ।
वरमिति संभाव्येते रम्भास्तम्भौ मृगीदृशामूरू ॥२०॥
हंसो मानसवासी यत्पदगतिमेतुमीहते संततम् ।
सुगतितामपहायोपेक्षन्तेऽक्षाणि न क्षणं दक्षैः ॥२१॥
तुलाननलिनास्यायाया ललनायाः प्रभुर्भवेत् ।
तुलाकोटियुगं यस्याः समुपास्ते पदद्वयम् ॥२२॥
मनोभुवाद्वैतविवादन्नचिरं वितन्वतोर्नूपुरयोस्तव स्वनम् ।
निजेन नादेन ददाति विश्रमं न मेखला भाति मृगाक्षि! मे खला॥
कम्बुकण्ठि! तव कण्ठकन्दले चोरयत्ययि! चिरं मनो मम ।
बाहुबन्धनमिदं मया कृते नीयतां निबिडतामपि त्वया॥२४॥
कोटिरोच्छिखरान्नदीपि हरित्सञ्चारिणी दीपिका
शङ्के शंबरसूदनस्य भवती रागान्धकारेऽध्वनि ।
कामं कामिनि यामिनीपतिमुखीं पाणौ गृहीत्वा हीत्तमतो
मुञ्चामि क्षणमेणशावनयने नत्वां जितस्ते रुच ॥२५॥
मन्ये वाचां तव विशदतालब्धये हारयष्टिः
स्वर्गङ्गा तत्समुदयपदं कण्ठदेशं परीत्य ।
त्वत्पीनोच्चैः कुचभृगुशिखारूढमात्रा पतन्ती
मुक्ता भासा स्थगितजगता याति सारूप्यमासाम् ॥२६॥
सम्मोहयन्ती वशमानयन्ती मनो मदीयं च चिरं हरन्ती ।
नानाभिचाकस्यापि किं सोदरः ॥३१॥
प्रियमप्रियकारणं प्रिये! यदि जानासि ततः कुतो न माम् ।
भुजपञ्जरसङ्कटे कृतं तुदती दन्तनखैः प्रसीदसि ॥३२॥
हृदि न कर्कशता किल चण्डि! ते किमुचिता सुतरामपि सम्प्रति ।
कठिनता सततं यदुदीतयो रवगता स्तनयोर्हृदयेन मे ॥३३॥
यत्ते वक्षसि चण्डि! पण्डिततया कुर्वे नखाङ्कानहं
यच्च त्वन्मधुराधरामृतरसानां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



..........................................................

.......................................................... ॥३४॥

..........................................................

सदयनं भवत्याविवोढुं यदहममरेशोऽस्मि चतुरे ! ॥३५॥

इति नये करुणामरुणानने! चरणयोररुणं तव यावकम् ।
उदयशैलतटेषु शनैः शनैररुणसारथिरेति तथा कुरु ॥३६॥

कान्तस्तेऽयमुपस्थितः सुनयने! सत्यं सुखान्तोऽद्य मे
युक्तस्ते पतितापहार इह किं तादृग्न याति स्वयम् ।
यायान्माधव एष ते शुचिपदं ग्रीष्मे वसन्तः कुतो
यद्देवं सखि! वां तदन्तरपथे मुग्धेव यातास्म्यहम् ॥३७॥

यस्मिन्पुरः प्रणयिनि प्रणते नताङ्गि!
किं साहसं वहसि दुर्वहभारमारात् ।
..................................
.................................. ॥३८॥

प्रसादितायाः प्रणयेन चाटु पटीयसालिङ्गनमिष्टमेव ।
स्वयंग्रहाश्लेषसुखानि तस्याः कस्याप्यवश्यं स्वरिहानयन्ति ॥३९॥

पिकेन कामाह्वयमादिशन्ती द्विजेन गीतोपनिषेविनासा ।
वियोगिता रागभृतेषु हृत्सु[सु]हृदामिदानीं कुरुते श्रुतिस्था ॥

चन्दनोपचितसौरभः शुभ्रः शीतलो जलधिकेलिभिः शनैः ।
दक्षिणः क्षणमुपैतु मे मुदे वल्लभः सखि! न नेति मारुतः ॥४१॥

पूर्णः कलाकलापेन यापयंस्तापसम्पदम् ।
तनोतु नयनानन्दं कान्तः किं सखि! नो शशी ॥४२॥

रसालकुसुमामोदा वासिताशां वरे मधौ ।
आलिङ्गामि निमग्नास्मि वरमानन्दवारिधौ ॥४३॥

यैरत्र शम्बररिपोरपिरोपपूरै-
गौरीगिरीशयुगलं गतमेकभावम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तैः पञ्चता विरहिणि मधुना मधौ तु
जीयादयं जगति पञ्चशरप्रपञ्चः ॥४४॥
चन्दनानां च सर्पाणां गुणौ मलयमारुते ।
पतियुक्ता वियुक्ताश्च विभज्याददतेऽङ्गनाः ॥४५॥
वदनाऽऽमोदविनिर्जितमधुविभवा कापि कामिनी विरहे ।
भ्रमरगुणं निजचापं कर्षति कामे जिजीव निःश्वासैः ॥४६॥
निजाय पित्रे मनसे ममत्मभूः सतीव्रतापायभयं ददासि किम् !
अनङ्ग किं ते कुसुमाशुगाह्वयं सतीव्रतापायभयं महन्न चेत् ॥
मलमारुतजं भयमालिमेन भवती भवति प्रतिकुर्वती ।
व्रज बहिर्यदि नो कुरुषे किमप्युचितमेव भुजङ्गमुपानय ॥४८॥
कज्जलं नयनयोर्गलज्जलं स्वदवारहरदङ्गलेपनम् ।
तत्र मामपि नियुज्य वससो व्यत्ययं किमकृथा वृथा विटे ॥४९॥

स्मरशरकुसुमोग्रद्रेणुधारान्धकारे
पथिक पथि कथं ते यानमानन्दकन्दाः ।
विरहविधुरचिन्ता चिन्तयन्ती भवन्तं
कृतदयशयने मा नूनमेकाकिनी भूत् ॥५०॥
नानाविनोदकुशलाः परितोऽपि सख्यो
दीर्घं दिनं गमयितुं प्रभवन्ति मुग्धे ।
रात्रौ तु बन्धुजनवागमृतेन सिक्ता
का नाम काममुपयाति सुखं न निद्राम् ॥५१॥
एकाकिनी विरचिता विधिना य दोषा
कुर्वन्ति तद्व्यधिकृतं वितथं न सख्यः ।
तस्यास्तु बान्धवजनस्य कुतो दया स्या-
दिष्टो जनस्त्वमिव निर्दयतामुपैति ॥५२॥
दिष्ट्या त्वयं शुचमसुंचदशोक एकः
पुष्पाणि पश्यत विटे वदन्तीति काचित् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मध्ये सखी समसमये किमिदं वदन्ती
कर्णं निनाय पुरतश्च पदं व्युदास ॥५३॥
अद्यापि नो कुरुबकः कुरुते विकाश-
माशङ्क्यतेऽत्र समये तरवोऽप्यसत्याः ।
तन्नानृतं कुरुबक व्रतमद्भुतं चे-
त्पश्याधुना किलत्र किं तत्र दर्शनं न ॥५४॥
प्रतिनिधिर्भवतो दयितो मयाऽनुजगृहे न पदोनिरतन्निति ।
यदि मयि स्मरसि स्मरवैरितां तदव मित्र कलत्रधियापि माम्
यस्ते श्रियं तनुरुचाहरति स्म मार
तत्प्रेयसी यदहमित्यपहंसि चेन्नाम् ।
पादाबाधि प्रणमिते पि मायद्यत-
स्मिन्कर्णोत्पलेन निहितेन हितेहितं किम् ॥५६॥
आस्ते भालतले ललामरचना नेन्दोः कलां कामये
हारो वक्षसि नोज्वलश्च भुजगः पाण्डुत्वमङ्गेषु च ।
पश्यैतद्विरहोद्भवं नभसि तं कण्ठे च कस्तूरिका
तन्नेतद्गरलं तदुग्रमतितः कस्मात्प्रहर्त्ता मयि ॥५७॥
भवति भवति भूयः पुष्पबाणैः प्रयासो
मदन मदनपायं त्वन्मनो नोत्सहेत ।
अशनिमशनिपर्णिं याहि याचस्व यन्मे
हृदयमदयशश्वत्कर्कशं शैलतोऽपि ॥५८॥
अत्रिलोचनभवस्त्रिनेत्रभूः कीर्तितोऽपि विबुधो जडात्मकः ।
तद्वदेष सखि शीतदीधितिर्निर्दहन्निह न मां विरुध्यते ॥५९॥
कन्दर्पदर्पपरिमुक्तशिलीमुखाली-
व्यालीढया वनितया स्वमीशन् ।
श्रीनन्दने मधुसुधाकरचन्दनेषु
किं नाम वामवचनं परिचीय तेन ॥६०॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सालि शंसालि शंसेति विधुन्तुद विधुन्तुद।
अहिते निहितेऽमुष्मिन्मुखिनः सखि नात्र के ॥६१॥
अशोकशाली सखि ते माधवोऽस्तु मुदे दृशोः।
स वेद शोकतामेति न ते शापाद्द्वयं मम ॥६२॥
कान्तारभितमाचक्षे वसन्तं सर्वतोऽपि तम्।
अन्यकान्तोपभोगं तत्कृतमाच्छ सतीह किम् ॥६३॥
यः कामः किल पञ्चकौसुमशरस्तस्याप्यमी साम्प्रतम्
नाराचा निशितास्तुदन्ति सविषा यन्मां पराद्धाधिकाः।
वामो दक्षिणमारुतो मलयजो लेपोऽग्निरेतद्विरा
विश्वामित्रभयेऽपि कं द्विजमिदं कर्तारमालिस्तु हि ॥६४॥
विरहो दधाति तेऽखिलं तदिदं किं पतति प्रकुप्यसि।
न निरागसि किं कदते पतनं चापि विरूप्यता ताप्यते ॥६५॥
पत्रं पतिं नय ममालिगिरेति वा मे
धाता न मामिति निहन्ति भवद्वियोगे।
त्वां प्राणनाथमनिशं हृदि भावयन्ती
प्राणप्रयाणसमयेऽपि भवद्भवामि ॥६६॥
प्राणैर्विना नो वरिवर्त्ति देहः प्राणा विना त्वां क्षणमक्षमा मे।
त्वं च प्रवत्स्यन्नसि जीवितेश! माभूदमीषां खलु सार्थभङ्गः॥
न जीवितायां मयि ते वियोगे कान्तापराधो भवता विभाव्यः।
प्राणाधिकास्त्वं हृदयं न मे यद्यपि क्षणं मुञ्चसि किं करोमि॥
निद्रा महाकैतविनी यतो मां मदेकदुःखाश्च सखीर्विहाय।
पतिं प्रवासे भजते तमद्य कान्तः कुतो जाग्रदुपेक्षते माम् ॥६९॥
यन्मया क्षणमुपेतनिद्रया प्रातरद्य सखि! ते श्रुतं मुखात्।
स्वं पराद्धगुणमेत्य याचिता देहि देहि तदहो तदेव मे ॥७०॥
वामो मुहुर्मुहुरयं स्फुरणच्छलेन
किं भाषते विदुषि! मे कथय त्वमूरुः।

For Private and Personal Use Only

संवाहनानि पतिपाणिसरोरुहस्य
नूनं नखाङ्कनमयेन बुभूषुरत्र ॥७१॥

नो वेद्मि समेति नेति विरहव्याधेः स धन्वन्तरिः
कान्तः कान्ततनुर्ननु प्रणयिना प्राणाः सह संयताः ।
तस्यास्ये मम चन्द्रमस्यपि मनः प्रागेव लीनं पुन-
र्याचे तद्विरहानलं दहतु मे देहं स नान्योऽनलः ॥७२॥

मृता मृते तं निजरूपसम्पद्विज्ञानसर्वस्वमिमां प्रमाय ।
संयोजयामास जवेन धाता जवेन भीतः स्वयशोविनाशात् ॥७३॥

वियोगिनी प्रच्युतपत्रराजी तापाकुला जीवितमुच्यमाना ।
घनाघनेनेव वनस्थली सा निर्वापिता वल्लभसङ्गमेन ॥७४॥

तावद्दुःखगदाभरादभिदुरे स्मृत्वायसा निर्मिते
दम्पत्योरुरसी वियोगदहने क्षिप्त्वा पुरा वेधसा ।
निश्वासश्वसनैश्चिरायधमता जानामि यन्तापिते
सद्यस्तत्र तदेकतां गमयितुं गाढे परीरम्भणे ॥७५॥

पत्युः परीरम्भणसम्भवोऽस्या न स्याद्गिरां गोचर एष हर्षः ।
भृतेऽन्तरे सत्यपि रोमराजीमुद्धर्षयेऽन्यो बहिराविरास्ते ॥७६॥

अनङ्गतप्तं मिलदङ्गसर्वमालिङ्गि या दयितेन चेतः ।
तन्मानसे मग्नमतोऽयमस्यां न स्तम्भभावः समुदेतु कस्मात् ॥७७॥

चञ्चलेन चलतादिशा दृशोऽप्यचलेन यदनङ्गमङ्गना ।
जीवयत्यधररदानपानतः सा न मर्त्यममरं करोति किम् ॥७८॥

भाले लोचनयोश्च गलयुगले कृत्वाचिरं चुम्बनं
प्राप्तानङ्गरसातिरेकमनसा मायत्रतायासवान् ।
विश्रान्तो दयिताकुचस्थलभुवि प्रीत्यार्पितं प्रेयसी
बिम्बोष्ठामृतपानकं पिबति यः सत्यङ्गपुण्याभृता ॥७९॥

विपरीतो रतिपतिर्येन स्त्री पुरुषायते ।
अनङ्गकृतोऽपि पुरुषः सन्महाश्रमदायते ॥८०॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रतातिरेके निजहारवल्ली धम्मिल्लमुक्ता कुसुमैः क्षरद्भिः ।
यं प्रेयसी पूजयतेति गौरी शिवं तमन्यं व शिवं ब्रवीमि ॥८१॥

कान्ताकुचस्थमकरीरचनाङ्कितोरा-
स्तद्दन्तदंशनयनाञ्जनमञ्जुलोष्ठः ।
तज्जाग्रदग्रकरजां च न रोचमानः
स्वं वीक्षतेऽत्र मुकुरे सुकृती दिनादौ ॥८२॥

चिकुराः कामकोदण्डगुणाः कृशतनोस्ततः ।
एते पुष्पाणि तद्बाणाः पतन्ति दयितोरसि ॥८३॥

ताम्बुलरागारुणनेत्रवर्त्मा पृष्ठा स्फुरत्कङ्कणलक्षणश्रीः ।
मुक्तावलीलाञ्छनलक्ष्यवक्षाः पतिः प्रियां लज्जयते सखीषु॥८४॥

आसत्यता कितवतेऽभिनवा विभाति
यन्मानुषीमपि रसेन चिकित्ससीति ।
गीर्वाण एव यदसि प्रति मां ब्रुवाणा-
स्त्वां सुराधिकगिरं प्रति किं ब्रवीमि ॥८५॥

वसति सका भवदन्तर्हृदयं निर्भिद्य माय निर्यातु ।
समहिमकुचकटिचक्रां मामयि चित्ते कथं कुरुषे ॥८६॥

यदभिदधासि भवत्या हृदयं मे बद्धमित्यहो न मृषा ।
अथ तन्मया विमुक्तं यातु यतो रोचते ततो रमताम् ॥८७॥

सखित्वादास्येन्दु वमोमृतानि किं मां पिबन्ती न सहेत निद्रा ।
त्वया तमिस्रामखिलमपीयं यदत्र भर्त्तुर्नयनान्निषिद्धा ॥८८॥

आयाति वारिरुहगन्धवहे समीरे
तारस्वरेण सखि कूजति ताम्रचूडे ।
निद्रावियोगमनुमीय मया मुहूर्त्त-
माश्लेपबन्धनमभेदि न नायकस्य ॥८९॥

नीवीमद्य किमलि यद्दृढयसे चक्रेऽपराधोऽनया
श्रान्तः कान्तकरोऽत्र किं नहि नहि प्राप्ते स्पर्शने ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वनप्रच्युतबन्धनाजनिततः किं कथ्यते किं मया
लज्जामोहमनोभवैर्विधुरया किञ्चित्समाज्ञासि न ॥९०॥

सर्वतो मणिनिर्माणे विजितेऽपि गृहान्तरे ।
कथं चन चिरान्मुग्धां लज्जामत्याजयत्पतिः ॥९१॥

निर्भररतविश्रामे दयितोरस्तरलनायकं पीत्वा ।
सहसा रमणं मुग्धा हन्ति सरोजेन मेखलाबद्धम् ॥९२॥

कान्तेन नीते तरसा दुकूले दीपेऽपि शान्ते निजचूर्णमुष्ट्या ।
स्वमेखलाहारमणिप्रकाशे नवोढयालिङ्गितमां स्वयं सः ॥९३॥

रात्रौ किं किमकारि तत्र गतया कान्ते भवत्या मुहुः
पृष्टा कैतवदक्षयेति निजया सख्याभिमुख्या पुरः ।
तत्तद्रात्रिकृतं तथैव सकलं संभावयन्ती क्वचि-
त्पृष्टेनेति गिरा न्यमज्जदहह व्रीडाम्बुधौ काचना ॥९४॥

वक्षःप्रक्षोभयन्ती तरलतरचलल्लोचनप्रान्तबाणै-
र्गात्रं भित्वातिमात्रं खरनखरमुखैराविशन्ती दशन्ती ।
दोषारोषादशेषामपि तदनुनयं नाददानाददाना
तापं या पञ्चबाणात्तदपि किमु न सा वल्लभा वल्लभास्यात् ॥

आयातायासमाया स्मरणपथमपि प्रेयसीध्येयसीमा
चेतस्येत प्रभेतत्सृजति वजति यत्तामृतेनामृतेन ।
व्रीडाक्रीडासनीडासनहसितमुहुर्दर्शनस्पर्शनाद्यं
तस्याः कस्यात्र न स्यात्सकलकरणहृन्मोहसन्दोहहेतुः ॥९६॥

स्फुरत्तारमणिश्रेणिमती गुणवती सती ।
अक्षमालाऽथवा बाला करग्राहोचिता सताम् ॥९७॥

कान्ताकुचाकृतिदृशापि निपीयमानं
श्रीशैलसानुयुगलं न महो मुदे किम् ।
युक्ता गुणेन परितो यदुपासमाना
मुक्ता अपि स्तनयनातिथयो भवन्ति ॥९८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामं नाम विपर्यये दयितया बद्धस्य मुक्तिः परं
मुक्तिः स्नेहसमीरितान्नतु परं मन्ये क्षरादक्षरम् ।
कान्तालिङ्गनसंभवान्नहि महानन्दः प्रमोदात्पृथक्
तत्किं तामपहाय कैश्चिदिह ब्रह्माप्तये क्लिश्यते ॥९९॥

यौवनस्था वनस्था वा सुन्दरी यदि वा दरी ।
रागेण वा विरागेण सेव्यतां सुरतेच्छया ॥१००॥

नैपुण्यार्जितपुण्यपुण्यमतुलः सर्वेन्द्रियार्थोदयः
कन्दर्पैकविलासवासवसतिः संसारसारं परम् ।
सा सारङ्गविलोचना विजयते यस्याः परीरंभणे
येनं कामिजनोऽनुभूय विशदानन्दाद्वयं विन्दति ॥१०१॥

नित्योन्नीतोरुधराधरभरविगलद्वारिधाराभिषिक्तः
स श्रीमान्मालयोऽसौ जगति विजयते सर्वनीवृन्नरेन्द्रः ।
मुच्छायैवारिवीरव्रजभुजमहसाक्रान्तभूकान्तसेव्यो
यस्मिन्सद्वंशशाली स च किल सकलो मण्डपो दुर्गमास्ते॥१०२

यस्याधीशो विधत्ते प्रणमदवनिभृन्मौलिकोटिरहीर
ज्योतिर्नीराजितांह्रिप्रबलरिपुबलारण्यदावप्रभावः ।
श्रीमानालमासाहिससमररसिकोबाणधाराभिवर्षी
चञ्चच्चक्षुस्तडागानरिनृपसदृशामुत्तटाम्भःप्रवाहान् ॥१०३॥

प्राचीनाः प्राप्रचीना अपि कपिकुलवद्दाक्षिणात्याः क्षणात्या
क्षोणीः क्षोणीमहेन्द्रा विजहति हतिभिर्जर्जरा गूर्जराश्च ।
अन्ये मन्ये नवान्ये चलचलनिलया किं च सर्वेप्यगर्वा
यस्मिन्नालंमासाहिक्षितिभृति विहितप्रस्थितौ दिग्जयार्थम् ॥

श्रीमालोरुकुले किलातिविमले जातो यदीयोभव-
न्मन्त्रीसोनगिरान्वयः श्रीतदयः श्रीझञ्झणो नाम सः ।
अद्धस्तैः शिशिरादिकैरिव लसत्सत्पक्षयं राजितो
वंशो यस्य विभाव्यते स्म भुवने षड्भिस्तनूजन्मभिः ॥१०५॥

For Private and Personal Use Only

प्राक्पुण्यकार्मणवशीकृतसिन्धुजेषु
तेषु श्रीतेषु समतामपि धीरधीषु । ।९०॥
सर्वज्ञसंज्ञमहसः स पुनः प्रसादा-
च्छ्रीबाहडः समभवद्बहुनागरीयान् ॥१०६॥
श्रीसङ्घप्रभुताभितस्य विमलप्राचीनपुण्याचल-
श्रेणीसत्परिम एक उदितो यस्यात्मजो मण्डनः ।
यः सारस्वतकाव्यमण्डनकविर्दारिद्र्यभूभृत्पवि- ।
र्विज्ञानां च यथा रविर्विजयते तीव्रप्रतापैर्भुवि ॥१०७॥ ३॥
श्रीसर्वज्ञपदाम्बुजालिशिरसा धर्मैकधामोरसा
विद्वन्मण्डनपण्डितेन कविना कान्तेन तेनामुना ।
श्रीमन्मण्डनसंज्ञकेन कविना शृङ्गारभङ्ग्या सत
श्लोकीश्लोक्यतमा समा विरचिता पीयूषपाथोधिना ॥१०८॥ ४॥

॥ इति मण्डनकृतं शृङ्गारमण्डनं समाप्तम् ॥

संवत १५०४ वर्षे कार्तिकशुक्लद्वादश्यां शनौ दिने लिखितं
पण्डितविनाइकदासकायस्थेन.

ात्॥

६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only